No. १५००

Title गदाधरी - काशिका व्याख्यां पूर्वपक्षग्रन्थ विवृतिः

Author गदाधरः

Extent २४ Age ५

Subject न्यायशास्त्रं

२४ ९९

गदाधरटीकायां काणिकाख्यायां पूर्वपक्षग्रंथविवृतिः

१५००

श्रीगणेशाय नमः ॥ अवृत्तिहेतुकेति वह्निमान् गगनादित्यर्थः । विशेष्यदलवैयर्थ्योद्धारं शंकते साध्येति उक्तरूपं साध्याधिकरणावृत्तित्वरूपं । किंतु
साध्येति साध्याधिकरणनिष्ठभेदप्रतियोगितावच्छेदकाधिकरणताकत्वं तादृशभेदप्रतियोगितावच्छेदकत्वं वार्थः । ननु गगनपदं यथाश्रुता
र्थे एव ईदृशार्थे तु आदिपदग्राह्यं वृत्तिमत्किंचित्स्यादित्यत आह साध्येति । सामान्येति । साध्याधिकरणताव्यापकं यदनधिकरणत्वं तत्त्वं साध्यासा
मानाधिकरण्यमित्यर्थः । चरमाधिकरणत्ववन्मध्यमाधिकरणत्वस्यापि विपरिणामात् साध्यवत्ताव्यापकीभूताभाववत्त्वमर्थः । साधिकरणत्वं हेतुता
वच्छेदकसंबंधावच्छिन्नप्रतियोगिताभिनिवेशलाभार्थं अत एव मूले तस्य दलस्य प्रयोजनं नास्तीति न केवलान्वयिनीत्यादिग्रंथविरोध इत्यतो न्नसा
धिकरणताव्यापकीभूतानधिकरणतानिरूपकत्वानधिकरणत्वविशिष्टसाधिकरणत्वरूपयथाश्रुतार्थे च दोषमाह । साध्येति । व्यभिचारिणि
द्रव्यं सत्त्वादित्यादौ । पदार्थेति । विद्यमानमधिकरणत्वं यस्येति विग्रहः भावप्रधानो निर्देशः । पदार्थो द्रव्यत्वादिः । साध्याधिकरणानधिकरणकत्व
रूपं साध्यवत्ताव्यापकभेदप्रतियोगितावच्छेदकाधिकरणताकत्वरूपं । उपपन्नाविति विशिष्टाधिकरणताघटितव्यापकतानिवेशात् द्रव्यं
विशिष्टसत्त्वादित्यादावव्याप्तिः । संबंधसामान्येनेति । यत्किंचित्संबंधेन व्यापकत्वानिवेश इत्यर्थः । अन्यथा यथाश्रुतासंगतेः गुणवान् कालि
कतया द्रव्यत्वादित्यादौ यत्किंचित्संबंधनिवेशकल्पनावतारितातिव्याप्तेरप्यनेन वारणसंभवात् । वस्त्वादेरिति । न चैतल्लक्षणे साध्यवदवृत्तिप
दार्थाभावे हेतुव्यापकताप्रवेशेन साध्यव्यापकत्वाभावापत्त्यभिधानमयुक्तमिति वाच्यं । साध्यवद्भेदस्यापि साध्यवदवृत्तिपदार्थत्वेन तदभा

पूर्व·

ग·टी·पू० वेसाध्येऽव्यापकत्वापत्तेरभिधानस्यायुक्तत्वात्।इदमप्युद्धं वह्निमद्वृत्तित्वावच्छिन्नात्यंताभावस्य वह्निस्वरूपत्वेपि साध्यवद्वृत्तित्वावच्छिन्नाभावस्य
१ साध्यस्वरूपत्वासंभवाद्धूमादेर्धूमाद्यव्यापकतापत्तिरितिकथनमयुक्तमेवेतिधूमादेर्वन्ह्याद्यव्याप्यतापत्तेरितियुक्तःपाठः।तच्छून्येसंसर्गतं
अभावस्यैवाप्रसिद्धेरित्यतआह।पदार्थाभावेति।संयोगेति।अन्यथात्रकेनापिसंबंधेनघटोनास्तीतिप्रत्ययानुपपत्तेः।भेदेनेतिप्रतियोगि
तावच्छेदकसंबंधतात्वेनावच्छेद्यतासंबंधतात्वेनावच्छेदकतेति।अवच्छेदकज्ञानादवच्छेद्यज्ञानंभिन्नमेवेत्यर्थः।संबंधत्वेनाभावप्रतियोगि
तावच्छेदकसंबंधत्वेमानाभावः।अखंडसंबंधतात्वंचनोपपद्यतेउक्तप्रतीतेर्भावकूटावगाहित्वेनोपपत्तेरित्याह।प्रत्येकेति।एतद्धटसाध्य
कोपेक्षाबीजमाह तद्धटादीति।व्यवस्थापकइति।अनुमापकइत्यर्थः।अनुमानप्रकाश्यरूपादिसाक्षात्कारःप्रकरणकःजन्यसाक्षात्कारत्वादिति
तथाचेंद्रियस्यस्वानुमापकघटकगुणाविषयकसाक्षात्कारजनकत्वनियमइत्यर्थः।सम्बंधसामान्यावच्छिन्नत्वंनैकवृत्तित्वस्येत्यतआह।संबं
धमात्रेणसाध्यवदवृत्तित्वंबोध्यं तेननसंबंधसामान्यावच्छिन्नसाध्यवदवृत्तित्वमादायार्थत्रयशंका।नहीति।घटभेदप्रतियोगितावच्छेदकघट
भिन्नभेदयोःसमनैयत्यं।गोरश्वादिति।पत्सामानाधिकरण्याभावत्वंसाध्यसामानाधिकरण्याभावव्यापकतावच्छेदकमित्युक्तौगौरश्वमितिभावः
।महाकालादौतदंतर्भावेणाव्याप्तिप्रसक्तिःलक्षणसमन्वयःसंभवतीत्यसंभवोनोक्तः।समवेतवान्जातेरित्यादिव्यभिलक्षणसंगतिर्बोध्या। राम०
महाकालान्यइति।अत्रचस्वरूपसंबंधेनमहाकालत्वसाध्यकेकालिकसंबंधेनघटादिहेतावव्याप्तिरादिष्टव्याप्यदिचमहाकालेएवकालिक १

आकाशादेः साध्यपदत्तित्वात्

संबंधावच्छिन्नाधिकरणतेति लक्षणसद्धे तुल्यमेव तदा महाकालान्यत्वसाध्यकेपि साध्यवत्कालिकसंबंधावच्छिन्नवृत्तिताप्रसिद्ध्या नातिव्याप्तिरि
तिध्येयं। ननु मणिकृतां साध्यसामानाधिकरण्यपादीत्यादिना द्विधा विकल्पकरणमनुचितं केवलान्वयिनि साध्यासामानाधिकरण्यपनिरधि
करणाख्याकाशादेरप्रसिद्धमित्यनेन साध्यासामानाधिकरण्यमित्यस्य साध्याधिकरणावृत्तित्वार्थकतायाः लक्षणघटकत्वतात्पर्यविषयत्वे
नप्रतीयमानतया साध्यानधिकरणावृत्तित्वार्थकत्वस्य लक्षणकर्तुरभिप्रायाविषयतया तस्मिन्दोषोद्भावनस्य किंचित्करत्वादित्याशंकाया
ह। यथासंभवमिति। एवं च लक्षणकर्तृतात्पर्याविषयोप्यपि लक्षणवाक्याद्यावानोऽर्थः स्फुरति तावंतो दूषयितव्या इति प्राचीनानां स्वभाव इति
तदनुसारेण मणिकृता तथा विकल्प्य दूषितमिति भावः। किमपराद्धमिति। तथा चाधिकरणभेदेन भिन्नत्वे अभावानामनंतधर्मिकल्पनमनंत
तधर्मिकाभावत्वकल्पनं चेत्यनंतगौरवमिति भावः। उद्देश्यपद्ये इति। द्व्येप्रतियोगिसमानाधिकरणशब्दार्थ इत्याद्युद्देश्यं। सामान्यत इत्यस्य प्र
तियोगिसामानाधिकरण्यपाठावन्यथादाहृतया त्वेति। व्यवह्रियमाण इति व्यवहारानुधावनं अव्याप्यवृत्तित्वादेर्वास्तवत्वार्थं। व्यपदिश्यत इति। सं
योगाभावे प्रतियोग्यधिकरणावृत्तित्वस्यैवसत्त्वेन तदभावस्यासत्त्वान्न प्रतियोगिसामानाधिकरण्यव्यवहार इत्यर्थः। ननु साधनसमानाधिकरणात्यो
न्ताभावाप्रतियोगिसाध्यवानयस्येत्यत्रान्यपदार्थस्य धूमस्य साध्यवत्पदार्थैकदेशे साध्येऽपर्यन्वयः स्यात्तदा व्यस्यार्थसंबंधो व्याप्यव्यापकभावरू
पइत्यात्याश्रयः स्यात्तथान्वय एव न साध्यस्यैकदेशत्वात् किंतु साध्यवत्त्वस्यैवात्र चान्यपदार्थस्याधिकरणत्वरूपषष्ठ्यर्थसंबंधित्वेनैव निवेश इत्याह। न

पू. वे.
ग. टी.
२

न्विति। यथाश्रुतदीधितिग्रंथाद्वैदनिवेशः प्रतीयते भेदस्तु नाप्यवृत्तिरतो व्याचष्टे। यादृशेति। ननु सामान्यधर्मावच्छिन्नावच्छेदकताकप्रतियो-
गिताकत्वस्य विशेषाभावकूटादावनंगीकारे सामान्यधर्मावच्छिन्नसाध्यकव्यभिचारित्वापत्तिव्याप्तिरिति व्याप्तिरितिचेन्न। मूलासंगतिवग्रहणामस्या
कं सानक्षतिकरीत्याशयः। अत्र हेत्वधिकरणवृत्तितावच्छेदेनाभावे यद्धर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वं तद्धर्मभिन्नसाध्यतावच्छेदका-
वच्छिन्नसामानाधिकरण्यमिति विवक्षयानकोपि दोषइत्यवधेयं सामान्यधर्मावच्छिन्नस्यानवच्छेदकत्वे धूमवान्वह्नेरित्यादावतिव्याप्तिमाह
अधिकमिति साधनेति। वह्निमान्धूमादित्यादौ साधनानधिकरणायोगोलकवृत्तित्वानधिकरणत्वस्यायोगोलकीयवह्नावसत्त्वेपि पर्वतीय
वह्नावेवसत्त्वान्नाव्याप्तिः समानाधिकरणयोरेवव्याप्तिरित्याशयः। महानसत्वादीति। साधनसमानाधिकरणधर्मानधिकरणमात्रवृत्तित्वे साध्य-
तावच्छेदकसंबंधावच्छिन्नत्वविवक्षणे धूमवान्वह्नेरित्यादौ वह्निसमानाधिकरणद्रव्यत्वमादायातिव्याप्त्यसंभवान्महानसत्वानुधावनं। प्रकारां-
तरं तरदनधिकरणमात्रवृत्तित्वं व्यभिचारित्वापादकधर्माधिकरणप्रसिद्ध्यातिव्याप्तिवारणेपि अव्याप्तेराह। यावतामिति। तथा च तादृशयावद्ध-
र्मवैयधिकरणानधिकरणत्वकूटमर्थः। तेन संबंधेनेति। धूमवान्वह्नेरित्यादौ साधनसमानाधिकरणयावद्धर्मानधिकरणमात्रवृत्तित्वं न धू-
मस्य तथाविधायोगोलकत्वाधिकरणे कालिकविशेषणतासंबंधेन तत्सत्त्वादतः साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशात्। इत्यवधेयमि- राम ०
ति। अत्र चोक्तस्थलसागस्य निवीजतया स्वयं महानसत्वमादायैवातिव्याप्तिर्दर्शिता धूमत्वस्य महानसत्वानधिकरणमात्रसंयुक्तत्वावच्छेदक २

त्वात्। रूपवानित्यादि। नन्वत्र दीधितिकृतां समानाधिकरणपदप्रयोजनदानाय केवलान्वयिसाधनकमनुसृत्यैव व्यधिकरणपदार्थवि
तर्के द्रव्यं रूपवान् वा पृथिवीत्वादित्याद्यनुधावनासंगतिः। केवलान्वयिसाधनक एव प्रयोजनसंगतेर्व्यतिरेक्यनुधावनवैयर्थ्यात् समाना
धिकरणयोर्व्याप्तिरिति मते इदं वाच्यं ज्ञेयत्वादित्यादौ विषयभेदेन विषयतायां नानात्वात् तत्तद्वाच्यत्वे तत्तज्ज्ञेयत्वानधिकरणावृत्तित्व
शून्यत्वसत्वेनैव लक्षणगमनात्। गमनाभाववानज्ञेयत्वादित्यादौ तत्तदनधिकरणमात्रवृत्तित्वविवक्षणोऽप्यसत्वात्। न चैवं मात्रपदार्था
नंतर्भावे द्रव्यं पृथिवीत्वादित्यनुधावनं व्यर्थं। न्यूनतासंगार्थमेव तदनुधावनात् केवलान्वयिसाध्यकस्य पूर्वोक्तत्वात् तदनुवृत्तिसत्वाच्च। प
र्वतीयधूमेति। तदनधिकरणमात्रवृत्तित्वाभाववत्साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यमर्थः। साध्यतावच्छेदकवैशिष्ट्यावच्छे
देन भावान्वय इति भावः। न्यूनेति। पर्याप्त्यवच्छेदकत्वमन्यूनानतिरिक्तवृत्तित्वसमनियतं तथापि स्फुटीकरणाय तदेवोक्तं। तदनधिकरणमा
त्रवृत्तित्वस्य स्वव्यापकतदनधिकरणताकत्वरूपत्वे तावदन्यतमत्वसमनैयत्यमर्थः। तदधिकरणावृत्तित्वविशिष्टतदनधिकरणवृत्तित्व
रूपत्वे तु तत्समनैयत्यं। साध्यतावच्छेदकताघटकसंबंधेनेति। अन्यथैवमपि कालिकसमवायाभ्यां धूमत्वविशिष्टस्य साध्यत्वे वन्ह्यादावतिव्या
प्तिः तादृशायःपिंडत्वानधिकरणमात्रवृत्तिताशून्यायोगोलकीयवह्नौ तथाविधकालिकसंबंधेन धूमत्वसत्वादिति चेन्न। तादृशधर्मानधिक
रणमात्रवृत्तित्वशून्यधर्मनिरूपितयत्किंचित्साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावृत्तित्वस्यैव निरूपेण साध्यतावच्छेदकताघटक

पू.वें.
प.टी.
२
3

तानादृशधर्मानुयोगिकतद्रूपविशिष्टसंबंधप्रतियोगित्वाभावस्य वाच्यत्वात्। एवमग्रेपि। अनुपपत्तिरिति। परंतु साधनसमानाधिकरणं
द्रव्यत्वमेव तदनधिकरणमात्रवृत्तिताशून्यं द्रव्यं तद्वृत्ति गगनादिभिन्नं च द्रव्यत्वमित्यतिव्याप्तिरिति भावः। न चेति। संयोगेन साध्यत्वे घटरूपा
दिधर्मत्वाभावात्समवायेनेति। दीधितेर्व्यर्थत्वं तात्पर्यं अन्यथा तादात्म्येन साध्यत्वानुरोधेन वैयधिकरण्यप्रशारिसंबंधित्वस्य वाच्यतया धर्मपदादा
नेपि गगनादेर्गुणत्वानधिकरणमात्रवृत्तित्वानधिकरणत्वाभिधानविरोधात्। तत्र वृत्तित्वनिवेशपक्षे तदभिधानमित्युक्तौ संयोगेन द्रव्यस्य सा
ध्यत्वे घटत्वानधिकरणमात्रसंयुक्तत्वशून्ये घटसंयुक्ते पटादौ द्रव्यत्वसत्त्वादतिव्याप्तिवारणात्। अनुपपत्त्या उपपादनासंभवेन। संदर्भेति। दीधि
तिकृता साधनसमानाधिकरणत्वेन घटत्वादीनामप्रदर्शनात्। गुणवत्त्वादिति। तथा चावच्छेदकलक्षणव्याप्तिरिति भावः। न च धर्मपदवशाद्गुण
त्वमादायाप्रसिद्धेरेव न तिप्रसंगानां संदर्भ इति वाच्यं। तादृशयावदवच्छेदकभेदकूटस्याव्याहतत्वादिति वक्ष्यमाणत्वात्। गुणत्वादीनामिति पदेऽत
द्गुणसंविज्ञानबहुव्रीहिणा घटत्वादीनामिति ग्रहणान्न संदर्भविरोध इत्यतो दूषणांतरमाह द्रव्यवानिति समवायेन साध्यतासाधनसमानाधिक
रणो यो धर्मस्तत्समवायि द्रव्यं तद्वैयधिकरण्यं शब्दज्ञानादौ प्रसिद्धं तच्छून्येषु समवायिद्रव्यगुणकर्मसु अवृत्तौ शब्दत्वज्ञानत्वादौ प्रसिद्धं वैयधिकरण्या
वच्छेदकत्वं द्रव्यत्वेनास्ति गुणावृत्ति वैयधिकरण्यशून्येषु तस्मिन् समवायित्वाप्रसिद्ध्या तदप्रसिद्धमित्यनवच्छेदकमेव द्रव्यत्वमित्याशयः। एवं द्रव्यत्व
कपालत्वादिकमादायापि बोध्यं। साधनसमानाधिकरणत्वाभावात्परत्र च तत्समानाधिकरणेपि तद्वैयधिकरण्यशून्यधर्मे घटरूपादौ सत्त्वापाः

राम. २

पूर्वत्रघटत्वादेः१

वृत्तेरिति ध्येयं। भेदकूटस्य यावत्सदलम्यनिष्कृष्टार्थस्य। स्येति। तत्सदंशीयो ऽधिकरणपदं स्वपदसमवच्छेदकपदं सामान्यपदं वह्नित्वादेरवच्छेदकत्वलाभाय।
अन्यथा ऽऽधेयमहानसीयघटादौ महानसीयत्वादिवैयधिकरण्यशून्यत्वसत्त्वे पर्वतीयवह्नौ तद्वैयधिकरण्यस्य च सत्त्वेनाव्याप्तेः। उक्तनिरुक्तसिद्धार्थस्याग
मावश्यकत्वेन अद्भुतघटनायोगो व्यंजयित्वा दोषांतरमपि दर्शयति। एतेनेत्यादिना तदनधिकरणमात्रवृत्तित्वं स्वव्यापकतदधिकरणताकत्वं
तदधिकरणावृत्तित्वोक्तौ जातित्वानधिकरणमात्रसमवेतत्वे तस्याग्रिमग्रंथालग्नकतापत्तेः। धूमादेरिति। परंतु तद्योगोलकासमानकालीनत
त्वादिनिष्ठतद्व्यक्तित्वस्यावच्छेदकत्वप्रसिद्धेः। तद्भिन्नत्वस्य धूमत्वे सत्त्वेनातिव्याप्तिरिति भावः। तथा चेति। अत्र साध्यतावच्छेदकसंबंधाविवक्ष
णे ऽपि वाच्यत्वसमानाधिकरणकालत्वानधिकरणमात्रवृत्तौ कालपरिमाणादौ प्रमेयत्वादेर्ध्वंसादौ च संसमवायादुपष्टंभासंगतिर्बोध्या। नन्वेतेने
त्यादिना प्रथमकल्पे समवायेन प्रमेयसाध्यकवाच्यत्वादावव्याप्तेः स्वानधिकरणत्वादेः प्रसिद्धेः सत्त्वात्तदनभिधाने न्यूनता एवं तादृशधर्मा
नधिकरणमात्रवृत्तित्वानतिरिक्तवृत्तित्वरूपयथाश्रुतार्थे तत्र दर्शनं चायुक्तं तादृशार्थस्याप्रकृतत्वात् (प्रथमकल्पे समवायेन प्रमेयसाध्यकवा)
(च्यत्वादिहेताव्याप्तिरित्यस्वरसात्कल्पांतरावलंबनमिति निरस्तम्) स्वानधिकरणत्वं स्वाधिकरणत्वसाध्यतावच्छेदकसंबंधेन संबद्धत्वोभया
भावः तथा च प्रमेयत्वाधिकरणत्वसमवेतत्वोभयाभावस्य तथाविधजातित्वाद्यनधिकरणमात्रसमवेते जातित्वादौ सत्त्वान्नाव्याप्तिरिति तन्नु
क्तं तथा सति तद्व्यक्तिधर्मसामान्यकत्वे तत्र धर्मपदवैयर्थ्यापातात्। तथाविधगुणत्वानधिकरणमात्रवृत्तिताशून्यत्वव्यापकताया द्रव्यत्वसमवेत

पत्तु ३

पू॰ पं॰
ग॰ टी॰
४

त्वोभयाभावे सत्त्वात्। स्वाधिकरणत्वसाध्यतावच्छेदकसंबंधावच्छिन्नसंबद्धत्वोभयाभाववत्त्वशून्यसामान्यकत्वस्याप्रदर्शनाच्चेति चेत् अत्रो
च्यते प्रथमकल्पेऽस्वारस्यं प्रकाशयितुमेतेनेत्याद्यभिधानात्। साध्यावच्छेदकत्वनिरुक्तेः प्रकृततावल्लक्षणातिव्याप्तिरेवाऽसाचनप्रमेयत्वाधिकरणाप्र न
सिद्धेतितद्दनभिधानसंगतिः। ननु द्वितीयकल्पेपि प्रमेयत्वाश्रयधर्मसामान्यान्तर्गतजातित्वादेस्तद्वैयधिकरण्यं दुर्घटमित्यत आह प्रमेयत्वेति
।साध्यतावच्छेदकसंबंधेन वृत्तिमत्त्वरूपधर्मत्वं निवेश्यमिति भावः। तच्छून्यधर्मावृत्तित्वस्य समवायेन द्रव्यप्रमेयसाध्यकेव्यभिचारिण्युक्तरी
त्यातिव्याप्तिभयेन प्रकारान्तरेण परिष्कुर्वतां मतमाह केचित्त्विति। संबद्धत्वमिति संबंधानुयोगित्वं तु नोक्तं जातिमान् सत्त्वादित्यादावव्याप्तेः जातेः
समवायाननुयोगित्वात्। यावत्त्वोभयाभावयोः प्रयोजनं स्फुटं। ननु संबद्धत्वस्य संबंधरूपतया स्वरूपसंबंधेन वृत्तिर्नेत्यत आह संबंधेति। वैयधिकर
ण्याभावानुरोधात् प्रतियोगिविधया तन्निवेशानुरोधात्। धूमवान् वह्नेरित्यादावपः पिंडत्ववैयधिकरण्याभावसाध्यतावच्छेदकसंबंधेन संबद्ध
त्वयोः कालिकसंबंधेन सत्त्वे न ज्ञानवान् द्रव्यत्वादित्यादौ तयोः विषयितासंबंधेन सत्त्वात् तत्संबंधसामान्येनाभावो न साध्ये इत्यतिव्याप्तिः। यत्किंचित्सं
बंधेन तदुभयाभावोक्तौ च समवायविषयितादिसंबंधावच्छिन्नतदुभयाभावस्य साध्ये सत्त्वादव्याप्तिरतः स्वरूपसंबंधावच्छिन्नतदुभयाभावनिवे रा म॰
शः स्वरूपेति। साध्यतावच्छेदकसंबंधीयसमवायादिसंबंधावच्छिन्नतदुभयाभावनिवेशे तत्स्य केवलान्वयितयाऽवच्छेदकलक्षणातिव्याप्ति ४
रपि दुष्टा। येन केनचिदिति। स्वरूपसंबंधत्वमनुगतमित्याशयः। एतन्मते तदनधिकरणमात्रवृत्तित्वं स्वव्यापकतदनधिकरणत्वं तदधिकर

णावृत्तित्वं वा प्रमेयत्वादेरिति मूले तु यथाश्रुताभिप्रायकं। अस्वारसश्च। अपाभावमनिवेश्य प्युपपत्तिरेवाधर्मत्वोपादानेति। तेन विनापि द्रव्यवान् मेयत्वा
दित्यादौ तादृशगुणत्वाधिकरणावृत्तित्वशून्येषु गुणगतधर्मेषु स्वाधिकरणताविरहेणातिव्याप्त्यसत्वात्। गुणत्वादिति पंचम्यर्थः प्रतियोगित्वं अंतर अन्य
पदार्थैकदेशाभेदेनान्वयः। विशिष्टशून्यत्वस्य तदधिकरणावृत्तित्वविशिष्टतदनधिकरणवृत्तित्वशून्यस्य। एतच्चैवैयधिकरण्यस्य तच्छून्यधर्मावृ त्व
त्तित्वघटकतत्पदार्थत्वेन। अर्थेति। विशेष्यविशेषणभावानापन्नां तर्भावेण प्रतियोगितावच्छेदकतासंबंधकल्पने मानाभावसूचनाय। वृत्त्यंश
स्य विशेष्यविधया निवेशस्यैव सार्थक्यरूपत्वात्। तावता तदधिकरणावृत्त्यभावाद्यावृत्तिसिद्धेः। एवमेव साध्यवद्भिन्नेयः साध्याभाववानिति कर्म
दत्रिति धारये साध्याभावांशनिवेशवैयर्थ्यबीजं बोध्यं। अवृत्तिमात्रमिति। धर्मपदसार्थक्यस्फोरकं। घटपटोभयत्वावच्छिन्नभेदादेः प्रमेयत्वव्यापकत्वेपि सा
ना ध्यतावच्छेदकसंबंधावच्छिन्नावच्छेदकत्वोपादाने यधिकरणप्रसिद्धिर्निर्वाहः। स्वव्यभिचारिणि साध्यं तदन्यत्वसिद्धेनो धर्मपदेति। स्वं नगगनं तद्व्या
पकत्वाप्रसिद्धेरिति भावः। तादृशमूलेति दीधितिकारीयमूलव्याख्यानमपि बोध्यं। स्वं स्वावच्छिन्नाधिकरणता। वृत्तिमत्वमिति सत्यंतमनुवर्तते।
उक्तरीत्या अखंडाभावसंपादकतया। उक्तक्रमेणेत्यदनधिकरणत्वस्य घटकतया संगमितस्य तस्य तदघटकतयाऽसंगतिः। तदधिकरणतायानि
वेशो व्यर्थ इत्यादि पाठः तथा चाधिकरणत्वानिवेश इत्यंतो बोध्यः पाठांतरं तु हेयं। गुणभेदे साधनसमानाधिकरणगुणत्वानधिकरणत्वेऽदुर्वारत्वा
दिति। अधिकरणतोपादानमिति वर्तते। निवेशनीयतयेति। अन्यथाऽयोगोलकासमानकालीनत्वणादावेव संबंधसामान्येनायोगोलकावृत्ति

पूर्वे॰
ग॰टी॰
५

5

त्वसत्त्वेनातिव्याप्तेः। अधिकरणतानिवेशेतु तत्तत्स्वरूपसंबंधेन तदधिकरणवृत्तित्वस्यवाच्यत्वान्नदोषः। तत्र तत्र द्रव्यगुणादौ। सत्तात्वस्यावच्छेदक
त्वमाधेयतानुगमककधर्मस्तत्तान्नदवच्छिन्नानतिप्रसक्ततयेतिबोध्यं। शुद्धेति। तथाचसत्तावान् द्रव्यत्वादित्यादावव्याप्तिरितिभावः। जगदीशेनतु
सामान्यधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वपर्याप्तिर्नोपगम्यते। नचतन्मतेसत्तावान् जातेरित्यादिसंग्रहायतादृशयावद्धर्माधिकरणवृ
त्त्यधिकरणतानिरूपकतावच्छेदकतापर्याप्त्यनधिकरणंसाध्यतावच्छेदकंलक्षणघटकं विशिष्टसत्तात्वे तादृशपर्याप्तिसत्त्वेनसत्तात्वे तदभा
वसत्त्वमिति वाच्यं। तथासतिसत्तावान्प्रमेयत्वादित्यादावतिव्याप्तेः। एवंचसामान्यपदोपादानेच। नचाव्याप्तिभयेनस्वरूपसंबंधावच्छिन्नवृत्ति
त्वनिवेशासंभवात्संबंधसामान्येनवृत्तित्वंनिवेश्यमितिधूमसंयोगस्यकालिकसंबंधेनअयोगोलकेसत्त्वादतिव्याप्तेःकुतउपेक्षेतिवाच्यं। कालि
कसंबंधानवच्छिन्नवृत्तित्वाभावनिवेशासंभवात्। नचैवमपिधूमवान् ज्ञानत्वादित्यादावतिव्याप्तिरितिवाच्यं। विषयतायावृत्त्यनियामकत्वात्। त
दधिकरणानुयोगिकत्वाभावनिवेशोत्ताह एवमिति। यत्तुसंबंधधर्मिकतादृशधर्माधिकरणविषयतानिरूपितसंसर्गत्वाभावनिवेशोमभिप्रेतइति
व्याप्तिः। अथविषयतास्थानेविशेष्यताविशेषणनिवेशेनदंडीपुरुषइतिज्ञानवारणान्नातिव्याप्तिरित्यतआह एवमितिसंसर्गेतेनतेषांशंकापंक्तिलाप
नप्रकारांतरमात्रंदूष्यं। भ्रमविषयतावारणार्थप्रयासापेक्षयादुर्वारत्वात्। यद्धर्मावच्छिन्नप्रतियोगिकत्वविशिष्टसाध्यतावच्छेदकसंबंधसामान्येऽ
नुयोगितानिष्ठतदधिकरणवृत्तितानवच्छेदकंतुसमवायेकारइतिदोषग्रस्तं। अतिप्रसंगभंगायरूपवान् वायुरित्यादिप्रतीतेः तत्प्रतियोगिकत्वविशि

राम॰
५

ष्टतत्संबंधानुयोगिताश्रयत्वं तेन संबंधेन तत्प्रकारकत्वं तेन संबंधेन प्रमात्वमिति प्रमालक्षणार्थः। अनुयोगितायां च कालिकसंबंधानवच्छिन्नवृत्ति
त्वाभावः स्वरूपसंबंधावच्छिन्नवृत्तित्वाभावो वा निवेश्यः तेन नातिव्याप्तिः। यादृशया यादृशरूपावच्छिन्नप्रत्यसंबंधावच्छिन्नाधिकरणतात्वमिति। या
दृशयादृशरूपवत्त्वमित्युक्तावधिकरणतापदानुपादाने दोषप्रसंगः संबंधानिवेशेन पूर्वपक्षानिरासश्चेत्यधिकरणतायामनुधावनं। तादृशरूपाव
च्छिन्नाधिकरणतासामान्यभेदनिवेशे कालोघटवान् महाकालत्वादित्यादावव्याप्तिरतः संबंधैक्यं। यादृशयादृशेत्युपादानातिव्याप्तिः। वह्नित्वावच्छि
न्नाधिकरणतात्वे तदवच्छिन्नभेदसामानाधिकरण्याभावादव्याप्तिं परिहरति शुद्धेति। ननु यद्रूपावच्छिन्नाधिकरणतात्वमप्रसिद्धं सामान्यधर्मावच्छि
न्नाधिकरणतायाः अनुपदमेव पूर्वं खंडितत्वादिति चेन्न। सामान्यधर्मावच्छिन्नाधिकरणतापि अनंगीकारेऽपि विशिष्टवह्नित्वावच्छिन्नाधिकरण
तामुपादाय तत्त्वे वह्नित्वस्यावच्छेदकताकाधेयतानिरूपिताधिकरणतात्वमुपेयते। तावदधिकरणतासु च तादृशाधिकरणतात्वमनुगतमेकं वर्तते इत्यवधे
यं। तादृशाधिकरणतात्वे भेदकूटसामानाधिकरण्यं च न भेदकूटाधिकरणानिरूपितवृत्तित्वं तन्न हि विशिष्टधर्मावच्छिन्नाधिकरणत्वप्रतियोगिकयावद्भे
दाधिकरणवृत्तित्वस्य तादृशाधिकरणतात्वे कामप्यधिकरणतामंतर्भाव्य सत्त्वासंभवात्। किंतु कूटघटकसकलभेदसामानाधिकरण्यं तत्। तच्च
तादृशाधिकरणताव्यक्तिद्वयांतर्भावेणाक्षतमिति बोध्यं। व्यभिचारिणीति। अन्यतमत्वादिवत्सत्त्वैकपदार्थसमानस्यापीति शेषः। मात्रपदार्थं स्फुटीकरोति
। व्यभिचारेति। सत्तामात्रपर्याप्तत्वविरहेणेति। ननु द्वित्वावच्छेदेन प्रसेकमपि पर्याप्तेः कथं न द्विरह इति चेदत्र केचित्। तन्मात्रवृत्तिताशून्यं धर्मसा

२ वं·
ग·टी·
६
6

मान्यं यदभाववत्तत्त्वमित्यर्थात् तद्द्वित्वस्य द्वित्वावच्छेदेन सत्त्वेऽपि प्रत्येकव्यक्तित्वावच्छेदेन तदभाववत्त्वात्तत्सत्त्वं द्वित्वेऽक्षतमिति नातिव्याप्तिः। अथैवं
वं सत्ताद्रव्यत्वोभयसाध्यके सद्धेतावव्याप्तिरिति चेदस्त्वित्याहुः। अन्ये तु धर्मताविशिष्टतादृशवृत्तिताशून्यतावच्छेदकधर्मावच्छिन्नापर्याप्तत्वमर्थः
प्रकृते सत्तात्वं तथाविधो धर्मः। सत्ताद्रव्यत्वोभयवान् द्रव्यत्वादित्यादौ तथाविधघटत्वाद्यनधिकरणमात्रवृत्तिताशून्यतावच्छेदकं सत्ताद्रव्यत्वोभ
यत्वमेवेति नाव्याप्तिरित्याहुः। पूर्वेति। न च पूर्वलक्षणद्वयदूषणपरत्वे विशेषाभावकूटादेर्वेत्यादिना वह्निमान् धूमादित्यादावव्याप्त्या दूषितत्वे न पुन
ता स्तत्रैवाव्याप्त्या दूषणोपन्यासमिति वाच्यं। सामान्याभावस्यातिरिक्तत्वपक्षे हि द्वितीयविशेष्यमात्रतया तन्मते पूर्वोक्तरीत्याऽव्याप्त्यभावात्तत्कारान्तरेणाव्या
प्तिप्रदर्शनसंभवादित्यदोषात्। साध्यतावच्छेदकसंबंधेनेत्यत्र तृतीयार्थोऽवच्छिन्नत्वं तस्याधिकरणपदार्थैकदेशेऽधिकरणत्वेऽन्वय इति केचित्।
किंचिदधिकरणं यस्यात्र कस्यचिदधिकरणे इति विग्रहात् साध्यतावच्छेदकसंबंधवद्वृत्तित्वं विशेषणं बोध्यं। समवायेनेति संयोगेनेत्यपि बोध्यं। अत्र
द्वयमिति। भेदप्रतियोगितावच्छेदकत्वरूपव्याप्तिघटकत्वप्रवेशेऽपि संयोगादिना साध्यतायां सत्तायामपि साधनसमानाधिकरणतया निरुक्तव्यतिरेकि
त्वाक्रान्ततया च तद्द्वयमधिकरणावच्छेदकाप्रसिद्धिरिति भावः। स्वनिष्ठेति तथा च स्वनिष्ठव्यतिरेकप्रतियोगितावच्छेदकेनयेनयेन संबंधेन यत्साधनसा राम०
मानाधिकरणं तेन संबंधेन तदनधिकरणमात्रवृत्तित्वेत्यादिरीत्या परिष्कारः। किंचिदिति। न च मूलहेतायावत्त्वस्य निवेशितत्वादिदानीं यत्किंचित्स
निवेशे मूलविरोध इति चेन्न। तत्तद्व्यक्तित्वेन साधनसमानाधिकरणधर्माणां निवेशलाभाय यत्किंचित्त्वाभिधानात्। यद्यद्धर्मावच्छिन्नाधिकरणता

यघत्संबंधावच्छिन्नयद्यद्धर्मावच्छिन्नाधिकरणतासामान्यं। यादृशेति। यादृशधर्मावच्छेदेन पर्याप्तायदधिकरणतानिरूपकतावच्छेदकता तदधिकरणता
सामान्यमित्यर्थः। उक्तस्थले च महानसीयत्ववह्नित्वोभयत्वादिस्तादृशो धर्मः। एकत्वावच्छिन्नपर्याप्तिकवह्नित्ववृत्त्यवच्छेदकतामादाय व्याप्तिवारणाय सा
मान्यपदं। ननु यादृशधर्मावच्छिन्ने साध्यमुक्तकल्पे महानसीयत्वविशिष्टवह्नित्वपर्याप्ताया अधिकरणतानिरूपकतावच्छेदकतायास्तस्या महानसीयत्ववह्नित्वो
भयत्वावच्छेदेन पर्याप्तिर्यथा वर्तते तथा महानसीयत्वविशिष्टवह्नित्वत्वावच्छेदेनापि तस्याः पर्याप्तिर्वर्तते एवेति यादृशशब्देन विशिष्टवह्नित्वत्वस्यापि
संग्रहसंभवेन तस्याव्यासज्यवृत्तित्वेन प्रत्येकवह्नित्वेन तदभावासंभवेनाव्याप्तिरित्यत आह वस्तुतस्त्विति। विशिष्टवह्नित्वत्वस्याव्यासज्यवृत्तित्वेन व्यासज्य
वृत्त्यवच्छेदकतापर्याप्त्यनंगीकारे तु पूर्वोक्तकल्पेन कोऽपि दोषः परं तु लाघवादेव वस्तुतस्त्विति कल्पावतारः॥ यादृशेति। ननु रूपवान् पृथिवीत्वादित्यादौ
विषयितासंबंधेन रूपत्ववज्ज्ञानस्य तादृशधर्मानधिकरणमात्रवृत्तित्वेनाव्याप्तेर्वारणाय यादृशावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकसंबंधा
वच्छिन्नत्वमावश्यकं एवं च संबंधभेदेनावच्छेदकताभेदान्महानसीयवह्नित्वनिष्ठसमवायावच्छिन्नावच्छेदकत्वोपादानादव्याप्तिरिति चेन्न। आक्षेप
तायां साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकताकत्वस्य विवक्षितत्वात् स्वरूपसमवायसंबंधावच्छिन्नावच्छेदकताद्वयसाधारण्या रूपे तो
हैवावच्छेदकतापर्याप्तेः॥ यद्रूपाश्रयावच्छेदकतानिरूपकाधिकरणत्वं निविष्टं तद्रूपवदवच्छेदकतानाम्नपत्वस्य यत्संबंधावच्छिन्नयद्रूपाश्रयाव
च्छेदकतानिरूपकयद्यत्संबंधावच्छिन्नाधिकरणत्वं निविष्टं साध्याधिकरणतायां तत्तत्संबंधावच्छिन्नतद्रूपाश्रयावच्छेदकतानिरूपकतत्तत्संबं

व्य॰
ग॰ टी॰
१७

धावच्छिन्नाधिकरणतानाभेदकूटस्य सामानाधिकरण्यस्यवाभिधानात्। तच्च रूपं तदधिकरणतानिरूपितावच्छेदकतात्वमेवेति। नत्विदानीमेवव्या
सज्यवृत्तित्वादीनामेव तत्तत्प्रमित्यनेनग्रहणसंभवात् तत्तद्भेदस्य प्रत्येकं सत्त्वेनदीधितिकृतामवच्छेदकत्वाभावानुधावनं व्यर्थमित्याशं
कांपरिहरति। तन्नदिति। अत्र च यादृशावच्छेदकतेत्यादिपाठेन भ्रांतकल्पितः विशिष्टधूमत्वावच्छिन्नाधिकरणताघटकावच्छेदकत्वादन्यस्य
धूमत्वावच्छिन्नाधिकरणतान्वघटकावच्छेदकत्वस्य प्रामाणिकत्वेनादोषादिति बोध्यं। मात्रपदेति। साधनसमानाधिकरणयावद्धर्मानधिक
रणमात्रेतिमात्रपदेत्यर्थः। व्यभिचारिणीति धूमवान् वह्नेरित्यादौ वह्निसमानाधिकरणयोगोलकत्ववृत्तिकालिकसंबंधेन धूमस्य सत्त्वात्तत्रसंब
द्धत्वसामान्याभावासंभवः। प्रलयपूर्वोत्पन्नकर्मादेरेव तादृशाभाववत्त्वादित्यतिव्याप्तिः। महाकालान्योन्याद्यादित्यादौ तादृशमहाकालत्वाधिकरण
संबद्धत्वसामान्याभावस्यावृत्तिमात्रवृत्तितया साध्येतच्छून्यत्वसत्त्वादतिव्याप्तिरित्यर्थः। सद्धेताविति। घटवन्निसज्ञानत्वादित्यादौ तादृशाधर्मवत्सं
बद्धत्वसामान्याभावाप्रसिद्धेः। ननु सं दोषइत्येवालमुक्तपदव्यर्थमित्यत आह उक्तोपीति। उक्तोपीत्युपादानफलं छलेनोदाहर्त्तुमाह केचित्त्विति। वि
शेषणादिति। तथा च वह्निमान् धूमादित्यादावेवाव्याप्तिरन्यत्रानुवर्त्तते इति सूचनायोक्तपदमिति भावः। ननु साध्यव्यापकत्वे सति साध्यव्याप्यत्वे स
तिसाधनाव्यापकत्वमुपाधित्वं एवं वह्निमान् धूमादित्यादौ धूमनिष्ठव्याप्तेर्धूमाव्यापकत्वघटिततया धूमनिष्ठव्याप्तिघटिकायाउपाधिनिष्ठव्याप्तेश्चो
पाधित्वेनाभिमतवह्न्यधिकरणत्वाद्यव्यापकत्वघटिततया धूमनिष्ठव्याप्तिशरीरे उपाधिनिष्ठव्याप्तेरेवघटितत्वात्तन्नात्माश्रय इत्याशंक्य तेयद्यपी

न
ना
त्र

रामः
१७

तिप्रकृतसाधनेति। प्रकृतसाधनाव्यापकत्वघटितोपाधित्वघटितत्वात्। तत्रचेति। यत्तुव्यभिचारितसंबंधावच्छिन्नसाध्यसमव्याप्ताभावसमभि
धायसाधननिष्ठप्रकृतसाध्यव्याप्तेः। अपिसाध्यसमव्याप्तत्वांशेप्रवेशादितितत्रवह्निमान्धूमादित्यादौनसंभवतिधूमेसाध्यसमव्याप्तत्वाभावा
दतःसाध्यसमव्याप्तहेतुर्घात्यः तत्रापिहेत्वन्यसाध्यसमव्याप्तसंभवेपिसाधननिष्ठसाध्यसमव्याप्तिमात्रेतात्पर्यंदोषइतिवक्ष्यंतदेतदपेश
लं। यदिहिधूमनिष्ठव्याप्तिर्नसाधनघटिताकथंकारमुपाधिनिष्ठव्याप्तेरूपाधिघटितत्वंभवेदिति। अभिप्रायेणोति। सिद्धसिद्धिव्याघातपरि
हारार्थंसाध्यसमव्याप्तव्यापकताभिधानेतुउपाधिनिष्ठव्याप्तौउपाधेरेवप्रवेशादात्माश्रयएव। व्यापकत्वमित्यत्रसाध्यव्यापकत्वंसाध्यनिरूपक
त्वंसाध्यभिन्ननिष्ठंचेन्निवेश्यतेतदासाध्यनिष्ठायांसाध्यभिन्नीयव्याप्तौसाध्यभिन्ननिष्ठव्याप्तिनिरूपकत्वप्रवेशादन्योन्याश्रयंस्फुटत्वादनभिधा
यसाध्यस्यापिसाध्यनिष्ठव्याप्तिनिरूपकत्वेनसाध्यनिष्ठायामेवसाधीयव्याप्तौतादृशव्याप्तिनिरूपकत्वप्रवेशादात्माश्रयोजगदीशाभिहितः।
तत्रसाध्यव्यापकस्यव्यभिचारितासंबंधावच्छिन्नाभावरूपव्याप्तौसाध्यव्यापकंयावदंतर्गतंसाध्यमपीतिसाध्येसाध्यव्यापकस्यव्यभिचारिता
संबंधावच्छिन्नाभावरूपव्याप्तिप्रवेशेपितस्यानसाध्यस्यानुयोगितयाप्रवेशोक्तिःसाध्यव्याप्यत्वसद्भावपक्षोक्तावात्माश्रयेसोवद्रूपितत्वात्सो
नरूत्यंचात्रतःस्थलांतरेदोषोयोजनीयस्तत्रस्वयंदीधितिस्थव्याप्यविशेषघटितविवरणमालोच्ययावत्साध्यव्यापकव्यापकत्वंयावत्साध
नाव्यापकाव्यापककसाध्यसामानाधिकरण्यंचेतिअनौपाधिकत्वयोः प्रथमेऽत्माश्रयः द्वितीयेऽनवस्थेतिएतत्स्वदर्शनपरतयादीधितिता

व्य॰
ग॰ टी॰
८
8

त्पर्यमाह यावदिति स्वं साधनं यावत्साध्यव्यापकं व्यापकं व्याप्तिनिरूपकं यस्य हेतोरिति युक्तेः। साध्यव्यापकयावदन्तर्गतवह्न्यादौ साधन
व्यापकत्वनिवेशो धूमनिष्ठव्याप्तिनिरूपकत्वस्य वह्निनिष्ठस्य प्रवेशो न त्वस्मिन्नुक्तस्य प्रवेशाद्वा स्वाश्रयः साध्यव्यापकत्वस्य साध्यसमानाधि
करणाभावाप्रतियोगित्वरूपत्वे तु एकत्र निर्णीतोऽर्थः सर्वत्रेति न्यायेन यावत्साध्यव्यापकेऽपि स्वसमानाधिकरणाभावाप्रतियोगित्वप्रवेशान्नात्माश्र
यः। नानवस्थेति साधनसमानाधिकरणाभावप्रतियोगित्वस्यैव निवेशे तथा साधननिष्ठव्याप्तिनिरूपकताया एवाप्रवेशादिति भावः। प्रतियोगित्वं
च विरोधित्वं न सहानवस्थाननियमलक्षणं गोत्वाश्वत्वयोरपि तथात्वात्। अन्योन्याभावप्रतियोगिन्यसत्त्वाच्चेति मूलं तत्र गोत्वाश्वत्वयोरिति
विरुद्धधर्मद्वयोपलक्षणं। तत्रानौपाधिकत्वघटकप्रतियोगिताया उक्तरूपत्वे विपक्षस्याभावात्तत्खंडनमिति नुचितमित्याशंक्य तस्याप्यलक्षणघटक
त्वे तदभावव्याप्यत्वस्य सहानवस्थाननियमपदार्थत्वपक्षेऽनवस्थां योजयित्वा तदधिकरणावृत्तित्वस्य तच्छब्दार्थत्वपक्षे सहेति ग्रंथं व्या
ख्यायाभावविरोधित्वस्याभावविरहव्याप्यत्वरूपत्वे अनवस्थाभयेनाभाववदवृत्तित्वरूपत्वमभिप्रेत्य भेदप्रतियोगिन्यव्याप्तिद्वारप्रकारो दीधिति
कृतां स्वातंत्र्येव तस्य मूलाभिप्रेताभावविरहव्याप्यतारूपत्वे येन संबंधेनाभावस्तद्वृत्तीत्यादिना ग्रंथेनान्योन्याभावप्रतियोगिन्यव्याप्तेरनुद्धारा
न्मूलविरोधापत्तेरिति तर्कालंकाराणामभिधानं तदेतदपेशलं सहानवस्थाननियमरूपविरोधितापक्षे एवानवस्थाया अभिप्रेतत्वात्। तस्या राम॰ ८
भावविरहव्याप्यतारूपत्वे सहेत्यादिग्रंथव्याख्यानविरोधात् न तदधिकरणावृत्तित्वरूपत्वे अनवस्थाया अप्रसक्तेः सहेत्यादिकमपि स्वातंत्र्ये

वेति तु न सत्। अन्योन्येति प्रतीकमध्ये तत्र एकदेशकालावच्छेदेन तदधिकरणावृत्तित्वं विवक्षितमित्यनभिधाय पूरणीयमित्यादिपदाभिधानेन
तन्मूलार्थत्वप्रतिपन्ने ततः स्वयंप्रकाशं ततेरणप्रघट्टकमेव व्याचष्टे सहानवस्थाननियमघटकस्येत्यादिना। व्याप्तिज्ञानेति धूमो वह्निव्याप्य इति ज्ञा
नेऽस्य नैरुपाधिकत्वविषयतानामनवस्थेत्यर्थः। अवस्थानं वृत्तित्वं सह तदधिकरणेऽवस्थानस्य नियमः सहावस्थाननियमः न सहावस्थाननियमः नञो
मध्यनिवेश इत्याशयेन शंकते यद्यपीति। सहावस्थानं तदधिकरणता तदभावः सहानवस्थानं तन्नियम इत्यभिप्रेत्य समाधत्ते तेन चेति। अग्रे इति। सत्ता भावा
भाववत्साध्यत्वशरीरे सत्ताभाववत्त्वस्य प्रवेशात्। तदेति एतेन तदधिकरणावृत्तित्वव्याप्यत्वं सहानवस्थाननियमशब्दार्थः सहानवस्थान
स्य नियम इति व्युत्पत्तेः तत्र अनवस्थायाः संगतिः नाप्यग्रिमग्रन्थासंगतिरिति प्रयुक्तं। व्याप्तिरिति साध्यवच्छिन्नानिरूपितत्वव्याप्याभाववन्निष्ठाधिकरणतात्वक
धर्मवत्त्वमर्थः। अभाववन्निष्ठाधिकरणतात्वव्यापकस्वावच्छिन्नानिरूपितत्वकधर्मवत्त्वमर्थः व्यापकत्वं तत्समानाधिकरणाभावाप्रतियोगित्वं तत्रापि च
सिद्धमेव प्रतियोगित्वमिति विषयतानवस्थेति वा। एकरूपेणेति। देशकालरूपावच्छेदकान्यतरत्वेन केवलावच्छेदकत्वेन वा तथा चाभावावच्छेदकाव
च्छिन्नयदभावाधिकरणावृत्तित्वं तदभाववत्त्वाभावप्रतियोगित्वमित्येवंरूपेणेत्यर्थः। तदनिरूपकत्वमिति। विशिष्टस्यातिरिक्तत्वे सामानाधिकरण्यस्याव्या
प्यवृत्तित्वे वा विशिष्टसत्ताभावप्रतियोगितापत्तिः संग्रहः। सिद्धान्तमनुरुध्याह तत्सामान्य इति। प्रतीत्यापत्तेरिति देशकालयोः पृथगवच्छेदकत्वसंभवात्। वृक्ष
निष्ठकपिसंयोगाभावे एतत्कालावच्छिन्नत्वशाखावच्छिन्नत्वयोः संभवात्। न च तादृशप्रतीत्याः भावाधिकरणतायामेव तदुभयावच्छिन्नत्वमानमुपे
यमिति नातिप्रसंग इति वाच्यं। अधिकरणतानुल्लेखेऽपि तादृशप्रतीत्यापादनात्। तत्कालेति। तत्कालावच्छिन्नार्थकस्येदानीमित्यस्य शाखायामन्व

२व
ग.टी.
९
9

पः॥ एवं च प्रतियोग्यधिकरणतायामभावावच्छेदकीभूतयादृशकालावच्छिन्नदेशावच्छेद्यत्वं बाधोत्ति तादृशकालावच्छिन्नदेशावच्छिन्नतद्
दधिकरणवृत्तित्वमेव निवेश्यमित्याशयवानाह तथा चेति। घटप्रागभावादेर्यदि तत्कालावच्छिन्नकपालिकाऽवच्छेदिका तदेदं लक्षणं अन्यथा त
ल्लक्षणांतरं। ननु यद्दिवसे शाखायां वृक्षे कपिसंयोगस्तद्दिवसे शाखायां तत्र तदभाववृत्तेः कपिसंयोगाभावप्रतियोगिलेऽव्याप्तिः। न च दिव
सादिस्थूलकालावच्छेद्यत्वमेव नोपगम्यते इति सुवचं क्षणत्वेनावच्छेदकस्य दिवसत्वाश्रयत्वादत आह कालपदमिति। ननु मूलावच्छिन्नशाखा
याः संयोगावच्छेदकत्वेऽग्रावच्छिन्नायां तस्यामेव तदभाववृत्त्यवच्छेदकतयाऽव्याप्तिरित्यत आह देशपदमिति अग्रे शाखायां न संयोग इति प्रतीत्या
ऽग्रावच्छिन्नशाखायामेवावच्छेदकतावगाहनेपि शाखायां न संयोग इति प्रतीत्या देशांतरानवच्छिन्नावच्छेदकतायाः शाखायां परिच्छेदादिति भा
वः॥ न च देशांतरावच्छिन्नावच्छेदकतातो भेदे मानाभावः यथा हीदानीमेतच्छाखायां वृक्षः कपिसंयोगी न तदानीमिति प्रतीत्या संयोगवृत्तावेतत्काला
वच्छिन्नैतच्छाखाया अवच्छेदकत्वं तदभाववृत्तौ च तत्कालावच्छिन्नैतच्छाखाया एवावच्छेदकत्वमवगाह्यते तदन्यकालानवच्छिन्नदेशनिष्ठावच्छे
दकता चेन्नोपेयते तदा एतच्छाखायां वृक्षः कपिसंयोगी तदभाववांश्चेति प्रतीत्यापत्तिरतः पृथगवच्छेदकतास्वीकार्या। यथा वा एतच्छाखायां वृक्षः क
पिसंयोगी न तच्छाखायामित्यादिना एतच्छाखावच्छिन्नैतत्कालस्य संयोगवृत्त्यावच्छेदकत्वं एतच्छाखावच्छिन्नतत्कालस्य तदभाववॉवच्छेदकत्वम दत्ता
वगाह्यते तदन्यापि देशानवच्छिन्नकालनिष्ठावच्छेदकतोपेया अन्यथा इदानीं वृक्षः कपिसंयोगी तदभाववांश्चेति प्रतीत्यापत्तेस्तथैवाग्रे शाखायां क ग.म०
पिसंयोगी न मूले इति वृक्षशाखायां वृक्षः कपिसंयोगी तदभाववांश्चेति प्रसंगवारणाय देशांतरानवच्छिन्नावच्छेदकत्वांतरमावश्यकमिति। अनव ९

च्छिन्नत्वेति। निरवच्छिन्नाभावाधिकरणावृत्तित्वमर्थः। स्वसमानाधिकरणेति अभावाधिकरणतायां निरवच्छिन्नत्वसत्त्वे यो दोषः प्राप्नोति तस्यापि प्रा
सूचनाय। एतेन तदनवच्छेदकीभूतदेशकालानवच्छिन्नतदधिकरणावृत्तित्वं तत्प्रतियोगित्वं तदनवच्छेदकत्वं चावच्छेदकतासंबंधेन तदभावव
त्त्वं तेन व्याप्यवृत्तिगोत्वाभावावच्छेदकाप्रसिद्ध्यापि न दोष इति तत्कालंकारोऽक्रमपहस्तितं वेदितव्यम्। कपिसंयोगाभावानवच्छेदको यो घटाद्यवयवस्त
दनवच्छिन्नवृत्तित्वेन कपिसंयोगेऽव्याप्तेः। अभावानवच्छेदको यो यो देशः कालश्च तत्तदनवच्छिन्नत्वोक्तावारोपिककपिसंयोगावच्छेदकशाखादेः सं
योगानुत्पाददशायामभावावच्छेदकतया तद्भिन्नगुणत्वाद्यैश्चा। एवं कपिसंयोगावच्छेदककालस्य मूलाद्यवच्छिन्नाभावावच्छेदकतया तद्भिन्नानित्यमेव तद
वच्छिन्नत्वाप्रसिद्धेरव्याप्तेः। अवच्छेद्यतासंबंधावच्छिन्नतदभावनिवेशेऽप्यवारणीयापाः। अभावानवच्छेदकोऽपि कालविशेषावच्छिन्नभागानवच्छिन्नदे
शास्तदनवच्छिन्नत्वविवक्षया कथंचित् अभावनिवेशोऽवच्छेद्यतासंबंधेन यादृशकालविशेषावच्छिन्नभागानवच्छिन्नदेशाभाववत्तादृशदेशा
नवच्छिन्नत्वविवक्षया वा वारणसंभवेऽपि कपिसंयोगादौ गगनाद्यभावप्रतियोगितापन्नेर्दुर्वारता। तदनवच्छेदकीभूतशाखाद्यवच्छेदेन वृत्तित्वादि
ति। तदधिकरणमभावाधिकरणं स्वप्रतियोगित्वेनाभिमतं। तदधिकरणं। प्रतियोग्यधिकरणं। अरुतत्वमिति अरुतत्वादिति पाठे निर्वाहद्वयम्। हेतु
५१ तत्र हेतुभ्यां दलद्वयमुपपादयति तथा हीत्यादिना। अत्र यल्लक्षणावच्छिन्नयद्यद्धर्मावच्छेद्यत्वनिवेशेऽग्रावच्छिन्नकपिसंयोगनिष्ठप्रतियोगित्वेऽ
व्याप्तिः। तत्र विशेष्यदलसत्त्वेऽपि स्वाधिकरणतायामभावाधिकरणतायां च तत्प्रागभावकालावच्छिन्नाग्रानवच्छिन्नत्वसत्त्वादतो यद्यल्लक्षणेति। त

शुद्धदेशस्यावच्छेदकत्वेऽपि विशिष्टतदभावमप्युपेत्य =५

थाचाभावाधिकरणतायां तल्लक्षणावच्छिन्नानवच्छिन्नत्वस्यापि सत्त्वेन स्वाधिकरणतायां तदसत्त्वेन नाव्याप्तिः यद्यल्लक्षणावच्छिन्नयद्देशानवच्छेद्यत्व
निवेशे अभावाधिकरणतायां सकललक्षणावच्छिन्नघटावयवानवच्छिन्नत्वात्तत्रैवाव्याप्तिरतो यद्यद्देशेति। एवं यल्लक्षणावच्छिन्नयद्यद्देशानवच्छि
न्नत्वनिवेशे स्वाधिकरणताया अभावाधिकरणतायां च संयोगकालावच्छिन्नमूलानवच्छिन्नत्वसत्त्वात्तत्रैवाव्याप्तिरतो यद्यल्लक्षणेति। स्वाधि
करणताया अभावाधिकरणतायां च सकललक्षणावच्छिन्नघटावयवानवच्छिन्नत्वात्तत्रैवाव्याप्तिरतो यद्यद्देशेति। संयोगविशेषः कपिसंयो
गादिः। घटस्य संयोगविशेषाधिकरणत्वे तदवयवस्यापि विभिन्नलक्षणावच्छिन्नस्याभावावच्छेदकत्वमेवेति। घटनिष्ठाया अभावाधिकरणतायां न
तदवयवानवच्छेद्यत्वं किंतु वृक्षादिनिष्ठतदभावाधिकरणतायामेवेति तामुपादाय सामान्याभावरूपसत्त्वं तादृशार्थशून्यत्वं सर्वत्रैव नोपपद्येतेति
तदनधिकरणतानुधावनं। ईदृशपक्षे तु कालमते गगननिष्ठे गगनाभावप्रतियोगित्वेऽव्याप्तिः। स्वाधिकरणतामादेनाप्रसिद्धगगनाधिकरणताया
धर्तुमशक्यत्वादिति बोध्यं। मूलाग्रादीति। मध्यमूलावच्छिन्न एकः अग्रमध्यावच्छिन्न एक इत्यर्थः।। अथायमपसिद्धान्त एव अवच्छेदकभेदेन सं
योगभेदादेकसंयोगस्य मध्यमूलाग्रुभयावच्छेद्यत्वासत्त्वादिति। अत्र केचित् वदन्ति। विभिन्नावच्छेदेनैकस्य मध्यभागरूपे एवान्यथान्यमध्यभागस्येव
साक्षादवच्छेदकत्वं मूलाग्रयोस्तु तदवच्छेदकतामात्रं घटते चेदं कथंचित्सरादीनां वृक्षस्य मूलाग्रयोर्मध्यसंबंधित्वात् अन्यथा एकसंयोगाभावाधि ग॰म॰
करणताया अपरसंयोगाधिकरणताया अमध्यभागानवच्छिन्नत्वान्मूलावच्छिन्नत्वाद्दोषानवकाशः [illegible]वच्छेदकभेदेन संयोगभेदात्। न चैवम १०

पियपत्वस्य तावच्छिन्नया दृश्यापादृश्यादेशानवच्छिन्नत्वविवक्षया न दोषः एकसंयोगाभावाधिकरणताया अपरसंयोगाधिकरणतायाश्च
मूलविशिष्टमध्यभागानवच्छिन्नत्वात् उक्तविवक्षायाश्चावश्यकत्वं अन्यथा शाखायां एवं विभिन्नभागावच्छेदेन कपिसंयोगतदभाववन्नया
अभावाधिकरणतायाः शाखानवच्छिन्नत्वासंभवेनोदासीनयत्नायववपवयवमात्रानवच्छिन्नतादव्याप्तेरिति वाच्यं। शाखायां अवच्छि
न्नावच्छेदकत्वेपि देशांतरानवच्छिन्नावच्छेदकत्वमप्युपेयते तथापि न क्षतिः इह तु तद्देवदेशांतरानवच्छिन्नावच्छेदकत्वांतरमनुपादाये
वक्ष्यतिरित्याशयस्तथाविवक्षायां गौरवं चेति। परे त्वेकस्यैव संयोगस्य दिग्देशोभयावच्छेद्यत्ववदेकस्यैव मध्यमूलमध्याग्रादिरूपदेशद्वया
वच्छेद्यत्वं बाधकाभावात्। तच्च तादृशसंयोगयोरसमनैयत्यार्थमेवापदि च यद्यद्वित्युक्तायां तद्दोषो वार्य इत्युच्यते तदा एकनानादिग्द्वया
वच्छिन्नं असमनियतसंयोगद्वयमादाय तादृश एव दोषः। अवच्छेदकप्रदर्शनस्यासमनियतसंयोगद्वयोपलक्षणत्वादित्याहुः। यादृशया
दृशावच्छेदकानवच्छिन्नत्वनिवेशादेतद्दोषोद्धार इत्यप्याहुः। परे तु मूलाग्रावच्छेदेन मूलाग्रावच्छेद्यः मूलाग्रयोरेव संयोगः तथा च मध्यभा
गावच्छिन्नो मूलसंयोगः मध्यभागावच्छिन्नोऽग्रसंयोगश्चेत्यर्थः। अथवा मूलाग्रयोरेव संयोगो मध्यभागावच्छिन्न एक उक्तः एकः पूर्वोक्तोऽग्रा
द्य इत्याहुः। अपरे तु संयोगपदस्य व्याप्यवृत्त्युपलक्षणत्वात् मूलमध्यावच्छेदेनैकः पटः अग्रमध्यावच्छेदेनापरः पट इति तादृशैकपटाभावप्र
तियोगित्वस्यापरपटे आपत्तिरभिप्रेतेत्याहुः। मूलावच्छेदेन एकसंयोगः अग्रावच्छेदेनापरसंयोगः तत्र एकस्यापराभावप्रतियोगित्वस्या

पक्षेनवकाशात्कम्प्यभागरूपेति। ननु एकसंयोगसमानाधिकरणोऽपरसंयोगो यथा कुण्डकशूलसंयोगव्यधिकरणो घटपटसंयोगः तत्रैक
संयोगेऽपरसंयोगाभावप्रतियोगित्वापत्तिरिति चेन्न। तयोर्भिन्नत्वाश्रयत्वतुल्यतया तत्रातिव्याप्तेः सर्वमत एवभावात्। यादृशायादृश्येति। कपिसंयोगा
भावाधिकरणतायां कालानवच्छिन्नदेशस्यावच्छेदकत्वानुगमानुद्दयगमेवाकालावच्छिन्नदेशस्येव विशिष्टत्वाभावयादृशपददानान्न
त्क्षणावच्छिन्नस्यास्यैव यादृशावच्छेदकपदेनोपादेयेति उभयाभावनिर्वाहः। विभिन्नभागावच्छिन्नस्यास्तायाएवावच्छेदकत्वेपि न क्षतिः। त
द्भागावच्छिन्नतत्क्षणावच्छिन्नस्यास्तायाएव यादृशपदेनोपादानसंभवेत्। अत्र यादृशयादृशावच्छेदकानवच्छिन्नत्वकूटावच्छिन्नत्वोभया
भाव एव निवेश्यः। न तु यादृशयादृशावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभावकूटं उक्तस्थले एकसंयोगस्यापरसंयोगाभावप्रतियोगि
त्वापत्तवारणात्। विशिष्टमविशिष्टं वा यत्र यदवच्छेदकं तत्र तस्यत्वाभाव यादृशयादृशेति। तेन कपिसंयोगतदभावाधिकरणतयोर्यावघे
कावच्छेदकावच्छिन्नत्वेपि प्रागभावप्रतियोग्यधिकरणतयोर्विशिष्टकालमात्रावच्छिन्नत्वेपि न क्षतिः। अवच्छेदकतापर्याप्तिविशेषस्तूच
ष्कं तत्सदसिति बोध्यं। कपिसंयोगादेश्च न गगनाभावप्रतियोगित्वप्रसक्तिः यादृशयादृशेति वीप्सासत्त्वेन मूलानवच्छिन्नत्वावच्छिन्नत्वोभयाभा
वस्याभावाधिकरणतायामेव सत्त्वात् प्रागभावप्रतियोगितासाधारणं चेदं प्रागभावाधिकरणतायाः स्वकालावच्छिन्नत्वावच्छिन्नत्वोभया
भाववत्त्वात् प्रतियोगिमत्तायाश्च तच्छून्यत्वादिति। यदभावेति कर्मधारयः। यदभावाश्रयवृत्त्यधिकरणता त्वव्यापकोपदर्शावच्छिन्ननिरूपि

तत्त्वाभावः स्वाश्रयवृत्त्यधिकरणतात्वसंबंधेन यद्भावो वा यद्धर्मावच्छिन्ननिरूपिततत्त्वाभावव्याप्यस्तद्धर्मवत्त्वमर्थः प्रयोजनं चोक्तमेवा अनुयो
गिताविशेषेति। प्रतियोगिमत्ताग्रहाविरोधितानियामकसंबंधेनेत्यर्थः तर्कालंकारानुयायिनस्तु स्वसंबद्धाधिकरणावृत्त्यभावाधिकरणता
सामान्यकत्वं सत्ताभावाभावप्रतियोगितासंग्रहाय विवक्षितं स्वप्रतियोगि। न चाभावाधिकरणावृत्तित्वाधिकरणताकत्वं कुतो नोक्तमिति
वाच्यं यथोक्तलक्षणे संबंधद्वयावच्छिन्नैकाधिकरणताया असत्त्वात्। अभावप्रतियोगितावच्छेदकसंबंधेन स्वेनैव स्वरूपेणाधिकरणं प्रवेश्यं
तेन कालिकसमवायोभयसंबंधावच्छिन्नसत्ताभावप्रतियोगितायाः संग्रहः। उद्भावितलक्षणे च तदसंग्रहः। कालिकसंबंधावच्छिन्नसत्ताधि
करणतासामान्यस्य समवायसंबंधावच्छिन्नसत्ताधिकरणतासामान्यस्य चाभावाधिकरणावृत्तित्वात् तादृशाभावस्य तदुभयसंबंधावच्छि
न्नसत्तावत्त्वप्रकारकप्रमाविषयत्वाभावे केनापि तादृशविषयत्वनिष्ठप्रतियोगितायाः एवं संग्रहः स्यात्। न च यथोक्तलक्षणे कालिकसमवायो
भयसंबंधावच्छिन्नसत्ताभावाभावप्रतियोगित्वासंग्रहः संबंधद्वयावच्छिन्नैकाधिकरणताया अप्रसिद्धेरिति वाच्यं। तत्र सत्ताभावाभावत्वं तदुभय
संबंधावच्छिन्नसत्ताप्रकारकप्रमाविषयत्वे एवोपगम्यते इति न तदसंग्रह इति प्रतिपत्तिः। भट्टाचार्यास्तु वक्ष्यमाणरीतेरेव निर्व्यूढत्वमभिप्रेत्यस ८
कलमिदमुज्झांचक्रुः। एकदेशेतिपदं देशकालावच्छिन्नत्वमभावाधिकरणतायां तद्भिन्नं तद्देशकालावच्छिन्नानुयोगिताकेत्यर्थः। यद्देश
कालानवच्छिन्नत्वेतियावद्देशावच्छेदकानवच्छिन्नत्वेत्यर्थः। एवमग्रेऽपि। न चाभावाधिकरणतायां यद्देशानवच्छिन्नत्वावच्छिन्नत्वोभयाभाव

श्व.
ग.टी.
१२
12

पयत्कालानवच्छिन्नत्वावच्छिन्नत्वोभयाभावोभयं तद्वदनुयोगिकत्वप्रतियोगिकत्वोभयं तत्तद्देशानवच्छिन्नत्वावच्छिन्नत्वोभयाभाव तत्तत्काला
नवच्छिन्नत्वावच्छिन्नत्वोभयाभावोभयं च निवेश्य तदुभयाभावः यादृशसंबंधसामान्ये तत्त्वमिति पृथग्देशकालपदोपादानाल्लभ्यते इति वाच्यं। का
लमादाय प्रागभावाधिकरणतायां देशानवच्छिन्नत्वावच्छिन्नत्वोभयसत्त्वात् कपिसंयोगाभावाधिकरणतायामग्रानवच्छिन्नत्वमूलावच्छिन्नत्वो
भयसत्त्वात्। कपिसंयोगकालानवच्छिन्नत्वशाखावच्छिन्नत्वोभयसत्त्वाच्चासामञ्जस्यादिति। नच रूपवृत्तिद्वित्वरूपादेः संयोगप्रतियोगित्वापत्तिः
द्वित्वादिसंयोगे संयोगाधिकरणतानिष्ठाभावस्य प्रतियोगित्वेन तदुभयाभावसत्त्वादिति वाच्यं। समकालोत्पन्नद्वित्वादेः संयोगप्रतियोगितापत्त्यभा
वात् भिन्नक्षणोत्पन्नानां तु तेषां परस्परप्रतियोगित्वे गोत्वाश्वत्वादिप्रतियोगित्वप्रसंगतौल्यमिति। अत्र चोभयाभाव इति पाठेऽभावाधिकरण
तायां यादृशोभयाभावस्तादृशोभयाभाववैशेष्येण तद्वन्निष्ठानुयोगिताकत्वनिवेशः एवमनुयोगिताधर्मिकोभयाभावकल्पे यदभावाधिकर
णतायां यादृशोभयाभावस्तादृशोभयाभाववत्तद्वृत्तित्वोभयमपि संभवतीति बोध्यं। सर्वत्र प्रथमोभयाभावः परिचायकः। धर्मिकेति प्रतियोगिता
वच्छेदकसंबंधावच्छिन्नाधिकरणतासामान्येऽभावाधिकरणानुयोगिकत्वयद्धर्मावच्छिन्ननिरूपितत्वतत्कालविशिष्टतद्देशानवच्छिन्नत्वाव
च्छिन्नत्वोभयाभावे तत्त्रित्वावच्छिन्नाभावः तद्धर्मवत्त्वमर्थः। नन्वेवमपि समनियतरूपरसादीनां तत्तदभावत्वरूपविलक्षणानुयोगितानिरूपितप्रति ए म०
योगित्वापत्तिः समनियताभावानामपि तत्तदभावत्वनिरूपितप्रतियोगिता तन्नैव नान्यत्रेतीशपथस्यासंभवादित्यत आह अधिकमिति। तन्निरूपकध १२

र्मवत्त्वं एषामेव लक्षणानां। यद्यपि स्वावच्छिन्नाधिकरणवृत्तित्वं धर्मे न भिद्यते तथापि तदधिकरणताविभिन्नैव। मूलाग्रावच्छिन्नसंयोगयोः परस्परप्रति
योगित्ववारणाय एकावच्छेदकेति। एवमपि घटत्वाभावप्रतियोगितादावव्याप्तिरिति चेन्न लक्षणद्वयं कार्यं। यद्वा यत्संबंधावच्छिन्नयन्निरूपिताधि
करणतायां यादृशावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववद्यं। तद्वन्निरूपिततत्प्रो विशेष्यताभाववदाधेयतानात्मपदइति निर्गलितं। स्वाधिक
रणो प्रतियोगितावच्छेदकसंबंधेन वृत्तिर्यद्रूपज्ञो न सत्ताभावप्रतियोगितासंग्रहोऽतोपस्येति। समवायेन सत्ताधिकरणोऽस्वरूपसंबंधेन घटाभा
वसत्त्वेप्यदोषाज्ञापरादिमात्रवृत्तिधर्मस्योभयावृत्तित्वेन घटादेर्घटाभावादिप्रतियोगित्वापत्तिरतः स्ववृत्तिरिति। घटाभाववत्समानाधिकरणो दंडोभ
यावृत्तेर्घटाभावघटान्यतरत्वस्य घटादौ सत्त्वादिति व्याप्तिरतः तदुभयावृत्तित्वकूटं बोध्यं। स्वभिन्नत्वेति अत्र समनियतरूपद्वयादेस्तन्न्दभाववत्त्वानिरूप
कप्रतियोगितावारणाय स्वनिरूपकत्वविशिष्टतद्धर्मवत्त्वं वाच्यं स्ववृत्तित्वं च स्वसमानाधिकरणत्वमिति बोध्यं। भावभिन्नवृत्तित्वनिवेशो गोत्वाश्व
त्वयोरिति मूलासंगतिरतो वृत्तिमन्निष्ठत्वं दर्शितं। तत्परिहारोपि बोध्य इत्यपिकारस्सूचितास्वारस्यं दर्शयति एवमपीति। अधिकरणस्वरूपत्वेति घटत्वा
भावद्रव्यत्वाभावयोर्गुणादिरूपाधिकरणस्य तदात्मकत्वैकत्वात्। दोषस्येति भेदाभावस्य प्रतियोगितावच्छेदकरूपतया तदन्यत्वस्योपाधावसत्त्वा
दितिभावः। स्वसमानेति। स्वत्वत्प्रागभावः। अत्रैकार्द्ध्वंसकालीनप्रागभावमादायार्द्ध्वनंनातीति व्यवहारप्रसक्तवारणाय समानकालीनांतं।
तादृशार्द्ध्वनाकालीनत्वं तु वाच्यं तेनार्द्ध्वंसेन ध्वंसोत्पत्तिक्षणोत्पत्तिकार्द्ध्वनप्रागभावेनार्द्ध्वनत्वावच्छिन्नप्रतियोगिताकत्वं। वस्तुतस्तु ध्वंसादेः

पूर्व० ग०टी० १२ पत्रे 13

सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्वीकारेपि तत्सामान्यवृत्तित्वं त्वीकृतं यत्किंचिदार्द्रेन्धनसत्त्वदशायां आर्द्रेन्धनांतरप्रतियोगिकप्रागभावा
दिसत्त्वेपि अत्रेदानीमार्द्रेन्धनं नास्तीति प्रत्ययो वारणीयः कतिपयार्द्रेन्धनध्वंसकतिपयार्द्रेन्धनप्रागभावोभयदशायां तादृशप्रत्ययस्य तदानीं
ध्वंसादेस्तादृशप्रतियोगिताकत्वमुपपाद्यः। ईदृशार्द्रेन्धनप्रागभावस्य संयोगेन धूमवत्ति तदार्द्रेन्धनावयवोत्पत्तेः प्राक् संभवत्येव। एवं ध्वंसेप्यू
ह्यं। अग्निमेतद्धूमादित्साध्यकेप्येवमेव तदार्द्रेन्धनव्यक्तेः समवायेन साध्यतायां परं ध्वंसादेः समवायिवृत्तित्वं तथात्वेतिप्रसक्ते आर्द्रेन्धनस्यैव त
त्र धूमादेरुपाधित्वसंभवान्नित्यस्यैतादृशस्थानुत्थानप्रसंगइत्यवधेयं। ध्वंसादेः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानुपगमेप्याह वस्तुत
स्त्विति। इतरथेति तर्कालंकारास्तु इतरथेति यद्रूपेणोपाधित्वव्यवहारस्तद्रूपेण प्रतियोगित्वस्यापि लक्ष्यत्वेऽस्यार्थः। भेदेति तथा च तत्प्रायः पिं
डभेदत्वादेः साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात्तद्रूपेणोपाधित्वव्यवहारो न स्यादतोऽसंतपदमुपाधिलक्षणे सार्थकं स्यादिति भाव इति
वदंति तेषामयमाशयः। व्याप्तिलक्षणे असंतपदस्य वक्ष्यमाणरीत्या सार्थक्यासंभवादुपाधिलक्षणे तत्सार्थक्यमिति दीधितिस्थलक्षणपदस्यो
पाधिलक्षणमर्थः तत्र साध्यवन्निष्ठाभावविरहत्वरूपप्रतियोगितानिवेशपक्षे अयःपिंडभेदत्वावच्छिन्नप्रतियोगितायास्तद्घटितलक्षणघटक
त्वाद्भवति अयःपिंडभेदत्वेनोपाधित्वव्यवहारः। इदानीं त्वभावविरहत्वस्य लक्षणघटकप्रतियोगितानिर्वचनत्वासंभवात्लक्षणे तदनिवेशाद् राम० १२
विध्यत्वेव भेदीयतादृशप्रतियोगिताया उपाधिलक्षणघटकत्वमिति तदेतद्दीधितिसंदर्भविरुद्धं। तत्र भेदप्रतियोगिताया धारणरूपावच्छिन्नसा

ध्यवत्त्वस्याभावप्रतियोगितावच्छिन्नं वा लक्ष्यमिति वितर्क्य द्वितीयपक्ष एव यद्वैयर्थ्यं न प्रथमपक्षे इत्याचेदनायेन तथात्वित्याम्प्रते एवं चे
न तथाशब्दस्य प्रथमपक्षे इत्येवार्थो युक्तः न तु तर्कालंकारोक्त इति तस्य तादृशार्थकत्वमाह भेदेति। लक्षणेतिव्याप्तिलक्षणे इत्यर्थः। तथा चा
भावविरहत्वरूपतल्लक्षणस्याव्याप्त्यादिग्रस्तत्वान्न लक्षणांतरमेवयान्त्यमिति भावः। यद्यद्रूपावच्छिन्नेत्याद्यर्थे यद्यद्रूपांतर्गतायःपिंडभेदत्वा
वच्छिन्नप्रतियोगितायां लक्ष्यत्व इत्यनेनासंततपदार्थघटितोपाधिलक्षणाघटकत्वं तद्घटिततद्घटकत्वप्रतियोगितालक्षणलक्ष्यत्वं वा विव
वह्नितनायः असंभवात्। न द्वितीयः रूपविशेषमनुपादायापि भेदनिष्ठभेदप्रतियोगितायाः तादृशलक्षणघटकताप्रदर्शने संभवात्। नांत्यः त
थासति पारिभाषिकप्रतियोगितायाः लक्षणघटकत्वप्राप्तेः परस्यार्थकासंभवादित्यपि दूषणं। अत्र तर्कालंकारे अयःपिंडभेदस्य तत्त्वेनोपाधि
त्वाभावेपि अयःपिंडभिन्नत्वेनोपाधित्वसंभवत्स्वे वा। धूमवत्त्वस्य अयःपिंडभेदभेदसत्त्वेपि अयःपिंडभिन्नभेदासंभवात्। धूमवन्मात्रस्यायःपिंड
भिन्नत्वादिति दूषणे न व्याप्तिलक्षणेऽतिव्याप्तेर्दुर्वचतामभिप्रेत्यासंततपदस्योपाधिलक्षणाव्याप्तिवारकतया दीधितिं योजयितुं इत्तरथा य
यद्रूपेणोसाध्यादिनाव्याप्यत्वं यत्तत्संकेरूपविशेषं पुरस्कृत्य सोपाधिव्यवहारानुपपत्तिपरिहारार्थत्वं निर्णीतं तत्र तदभिमतमतिव्याप्तिसत्त्वं दूषयितुं
शंकते अथेति। अयोगोलकभेदेति। अयोगोलकभिन्नत्वावच्छिन्नोपि विधेयः घटाभावभिन्नमिति अत्र व्यभिचारस्थानान्यत्वे साध्यवत्त्वान्यदि
त्तिसाध्यवदसंग्रहे व्यभिचारस्थानान्यत्वावच्छिन्नसंग्रहसंभावनाप्युदासः। तर्कालंकारे तु रूपकरीत्या घटाभावभिन्नत्वावच्छिन्नस्यानुपाधित्व

सर्वे
ग०टी०
१४

शंकायां घटाभावान्यत्वावच्छिन्नभेदस्य घटाभावत्वरूपत्वमुपेयते न घटाभावरूपत्वं तथा सति निर्घटभूतले तत्सत्त्वादयं देशो न घटाभावान्य
इति प्रत्ययापत्तेस्तथा च तस्य साध्यसमानाधिकरणत्वाद्घटाभावान्यत्वावच्छिन्नस्योपाधित्वं भवत्येवेति समाधानं दर्शितं तन्न समाधानं सि
द्धांतसिद्धवृत्तिविशेषेणैव तादृशप्रत्ययापत्तिवारणस्य शंकितुरनुमतत्वात्तस्य धर्मरूपताकल्पकयुक्त्यभावात् न चैवं धूमाभावधर्मिक
जलादिवृत्तित्वविशिष्टगोत्वाभावाभावस्य धर्मिरूपतापत्तिस्तथापि कापि जलादावपि तदभावप्रत्ययप्रसंगादिति प्रत्नैः शेषित्वापत्तिस्तत्रा
पि वृत्तिविशेषस्यैव तादृशप्रत्ययवारणसमर्थस्य संभवादिति वाच्यं । तत्र तादृशगोत्वाभावाभावो न धूमाभावमात्रवृत्तिरतस्तत्र प्रतियो
गिकरणावृत्तित्वापादितेऽस्माद्घटाभावमात्रवृत्तित्वेन तुल्यप्रकृते इति । वस्तुतस्तु जलादावपीत्यादेः समनेपस्य भंगेनासर्यापत्तेः अत्रान्योन्या
भावप्रतियोगितासाधारणप्रतियोगितायालक्ष्यत्वेऽपि अत्यंतपदप्रयोजनं न संभवतीति शंकतेऽथेति । अत्रात्यंतपदानिवेशे घटाभावभे
दस्य साध्यवन्निष्ठभेदप्रतियोगित्वात्साध्यव्यापकत्वाभावेन यथोपाधित्वं नास्ति तथा घटाभावभिन्नत्वावच्छिन्नस्यापीत्याह घटाभावभिन्नत्वा
वच्छिन्नस्यापीति । ननु अत्यंताभावनिवेशे घटाभावभिन्नत्वस्य गगनाभावसाधारणतया तादृशभिन्नत्वावच्छिन्नस्य केवलान्वयित्वेन साध्य
व्यापकत्वसंभवेऽपि अत्यंताभावघटितसाधनाव्यापकत्वं न संभवति घटाभावभिन्नत्वावच्छिन्नस्य केवलान्वयित्वे न तदभावासंभवात् वक्ष्य
माणादिशा दलांतरेऽत्यंतपदस्य निवेशनीयत्वादित्यत्यंतपदनिवेशे उपाधेर्दुर्मिलतया उक्तलक्षणोऽतिव्याप्तिरित्याशंकां निरस्यति तत्पददाने

राम-
१४

14

पीति एवं च तत्पदाने घटाभावभिन्नस्योपाधित्वासंभवेऽपि घटाभावभेदादेरेवोपाधित्वसंभवान्नातिव्याप्तिरित्याशयः। तत्र घटाभावभेदादि सा-
ध्यके घटाभावभेदाद्युपाधेः घटाभावभिन्ननिष्ठघटाभावरूपस्यात्यन्ताभावप्रतियोगित्वात्साध्यव्यापकतासंभवात्। घटाभावभेदस्य साध्यव्यापक-
तासंभवेनोपाधित्वासंभवेऽपि घटाभावभिन्नस्यात्यन्ताभावासंभवेन साध्यव्यापकत्वसंभवतीति तस्यैवोपाधित्वमिति शंकते न चेति। न च
साध्यव्यापकत्वसंभवेऽपि साधनाव्यापकत्वं घटाभावभिन्नत्वावच्छिन्नस्य दुर्घटमेव साधनाव्यापकत्वदलेऽप्यत्यन्ताभावत्वनिरूपितप्रतियोगितायाएव
निविष्टत्वादिति वाच्यं। साधनाव्यापकत्वदलेऽत्यन्तपदनिवेशे प्रयोजनविरहेण घटाभावभिन्नस्योपाधित्वमिति न चेत्याशंकितुर्भ्रम इत्याशयः।
अत्र सद्धेतावव्याप्तिभिया साधनाव्यापकत्वदलेऽप्यत्यन्तपदस्यावश्यकतया घटाभावभिन्नस्य साधनाव्यापकत्वासंभवेनोपाधित्वासंभवादतिव्याप्ति-
रित्याह घटाभावेति। उक्तक्रमेणात्यन्ताभावत्वनिरूपकप्रतियोगिताविरहेण। विवक्षेति। साध्यवद्वृत्तितावच्छेदकीभूताभावत्वरूपानुयोगितानि-
रूपितप्रतियोगिताशून्यत्वे सति साधनवद्वृत्तितावच्छेदकीभूतात्यन्ताभावत्वनिरूपितप्रतियोगितावत्त्वरूपदलद्वयार्थविवक्षणे इत्यर्थः। साध्यव-
द्वृत्त्यभावभिन्नवृत्तितावच्छेदकघटात्यन्ताभावत्वनिरूपकप्रतियोगिता न घटाभावभेदत्वेनावच्छिद्यत इति घटाभावभेदादेरुपाधित्वं सूपपादमिति
चेत्तदा साध्यवद्वृत्त्यभावभिन्नवृत्तितावच्छेदकात्यन्ताभावत्वनिरूपकप्रतियोगिता घटाभावभिन्नत्वेनावच्छिद्यत इति तदवच्छिन्नस्याप्युपाधित्वं साध्या-
भाववत्त्वस्यैव साध्यवद्भेदत्वस्यापि साध्यवद्वृत्तितानवच्छेदकत्वादित्यर्थः। अत्यन्तेति। तथा चैवं विवक्षणेऽपि अत्यन्तपदमनंतर्भाव्य दलद्वयपरिष्कारेणो-

स॰ वै॰
ग॰ टी॰
१५
15

वघटाभावभेदस्योपाधित्वसंभवे अस्यंतपदमनर्थकमितिभावः। अस्यंतपदमनिवेश्य निवेशस्तु साध्यवन्निष्ठाधिकरणतानिरूपकतावच्छेदकाभा
वत्वनिरूपकप्रतियोगिताशून्यत्वे सति साधनवन्निष्ठाधिकरणतावच्छेदकाभावत्वनिरूपकप्रतियोगित्वमिति। अभ्युपगमेवातदुभयं प्रतियोगीति नि
यथाश्रुतमस्मिन्मते विशिष्टाभावाप्रसिद्ध्या घटाभावसत्तादाहृत्यासङ्ग्रहेति एतेन वैशिष्ट्यानवच्छिन्नत्वस्यागेपि नक्षतिः। अस्यंतपदस्येति। स्वरूपसंबं
धरूपप्रतियोगिताकल्पे ऽत्यंतपदसार्थक्यमस्त्येव अभावविरहात्मत्वं वेत्यस्य पक्षतोपयोगिप्रतियोगितापरत्वेपि तत्पदसार्थक्यं सिद्धांतयितु
मिदानीं तन्नैरर्थक्यमाशंकितमिति बोध्यं। अभावज्ञानेति। नन्वेवं विवक्षणेऽभावज्ञानस्य तत्तद्व्यक्तित्वेन प्रवेशः किंतु घटाद्यभावज्ञानत्वेनैवेत्यभि
धानीयतया प्रतियोगिविषयकजन्यज्ञानमात्रस्यैवजन्याभावज्ञानावच्छेदककालावच्छिन्नत्वात्तद्यप्रतियोगिताऽनमप्रसिद्धं एकस्य पुंसः प्रति
योगिज्ञानोत्पन्नक्षणेऽपुरुषांतरस्याप्यभावज्ञानं नजातमितिवक्तुमशक्यत्वात्। नचाभावज्ञानस्य तत्तद्व्यक्तित्वेनैव निवेशः प्रतियोगिपदस्यश
क्यानन्वयापन्नेरितिचेन्न। अभावज्ञानत्वेन निवेशेपि न दोषः प्रतियोगिज्ञानस्येश्वरीयस्यैव ग्रहीतुं शक्यत्वात्तस्य वाभावज्ञानावच्छेदककालानवच्छि
न्नत्वादीश्वरज्ञानस्य आप्यवृत्तित्वेन लक्षणगमनात्। अतिप्रसक्तिमिति। यथाश्रुते घटभेदज्ञाने तादात्म्येन घटप्रकारकज्ञानस्यैव समवायेन घटत्व
प्रकारकज्ञानस्यापि प्रतिबंधकतया नद्विषयतया घटत्वेपाऽतिप्रसक्तिः तामित्यर्थः। विषयिता याद्दृत्स नियामकत्वमते त्वाहकालिकेति। व्यधिकर ए म॰
णेति कारणीभूताभावप्रतियोगित्वरूपं प्रतिबंधकत्वं निविष्टमित्याशयेनेदं। समामविशेष्यते तिअत्र केवलव्यभावज्ञानेवह्निज्ञानमात्रं प्रतिबंधकं १५

ननु तर्हि पर्वतविशेष्यकवह्निज्ञानस्यापि ह्रदविशेष्यकवह्न्यभावज्ञानप्रतिबंधकतापत्तिरिति चेत् इष्टत्वात् वह्निमान् पर्वत इति ज्ञानस्य प्रतिबंधकत्वे
पि विषयतया ह्रदेऽभावादेव तद्दशायां ह्रदादौ वह्न्यभावज्ञा [redacted] नोत्पादानुपपत्तेरनवकाशात्। न च भावज्ञानेऽज्ञा
नमात्रस्य प्रतिबंधकत्वं स्वीक्रियते प्रतियोगितावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतायाः संबंध
त्वस्वीकारे गौरवात्तिप्रसंगवारणसंभवात्। एवं च रूपस्य संयोगेन भ्रमस्याप्रसिद्धावपि केवलरूपविशेष्यकज्ञानमादायैवाव्याप्तिवारणं संभवतीति चेन्न।
तद्धर्मावच्छिन्नप्रकारकज्ञानस्यैव तद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यत्वं संसर्गेण न तु केवलज्ञानत्वावच्छिन्नस्येत्याशयात्। प्रागेवोक्तमिति। त
था च प्रतिबंधकतांतरनिवेशेन दूषणदानमयुक्तमिति सूचितं। प्रमामिति। ईश्वरीयप्रतियोगिज्ञानमादायैव लक्षणासंगतेः प्रागुपदर्शनेपि एक
त्रेत्यत्नीसभिप्रायेणाप्रमापदं ज्ञानस्येश्वरीयत्वसूचकं वा। न चैतत्कल्पे तत्प्रतियोगिविषयकसम्बंधांतरावगाहित्वप्रदर्शनं व्यर्थं तादात्म्यविषयिता
दिना गगनादिप्रकारकत्वस्येश्वरज्ञाने संभवेपि प्रतिबंधकज्ञानविशेष्यत्वादप्युपपत्तेरितिवाच्यं। तथापि सामानाधिकरण्यसंबंधेन समानविशेष्यता
प्रत्यासत्त्या च प्रतिबंधकतयोः प्रतियोगितावच्छेदकसंबंधावच्छिन्नप्रतियोगिप्रकारताघटितसंबंधनियंत्रिततया संबंधांतरावगाहितज्ज्ञानेऽसत्त्व
लाभार्थत्वात्। सा च स्वरूपसंबंधरूपेवाऽऽस्तां प्रतियोगितानुनिरुक्तरूपेतितदसत्ता। प्राचां मते प्रतियोगितायाः संबंधत्वात्। अनुयोगितायाः स्वरूपसंबं एव
धात्मकत्वे निरुक्तापेक्षया लघोः अनिरूपकत्वस्यैव तथात्वौचित्यादिति न व्यर्थतासमाधानस्येदानीमयुक्तत्वात् इदं त्ववधेयम् इत्यादिना नव्यमतस्यवक्ष्य

प्रतियोगितात्वौचित्यादिति· यत्तु स्वाभावेत्यत्र स्वस्वसंबंधोनुयोगितैव· न तु प्रतियोगिता २

पू.वं.
ग.टी.
१६
16

मात्रत्वात्। संयोगादिरूपसंबंधे तु अनुयोगिन्येव संबंधः। अन्यथा वदरादौ कुंडादिमत्त्वधीप्रसंगात्। एवं च घटो नास्तीत्यादौ प्रतियोगितायाः संबं
धत्वमयुक्तं अधिकरणानिरूपसंबंधस्यैव प्रतियोगिताकारतावच्छेदकत्वनियमात् अतो घटोनेतरागीसादावनुयोगित्वं संबंधविषये वानुप्रवे स्व
शादिति प्रतिज्ञादीधितिमनुरुध्य मणिकारोक्तस्वरूपसंबंधरूपप्रतियोगित्वं दूषयति इदमिति प्रतियोगिन एवैतत्त्वैवकारेण घटप्रतियोगिकत्वादिव्यव
च्छेदः। स्वनिष्ठानुयोगितानिरूपकत्वसंबंधेन ध्वंसत्वावच्छिन्नंप्रतितादात्म्यसंबंधेन प्रतियोगिनः कारणत्वे गौरवात् प्रतियोगित्वं वा कार्यतावच्छे
दकसंबंधो वाच्य इति प्रतियोगित्वसिद्धिं शंकते ध्वंसस्येति। नित्यनाशापत्तिभिया ध्वंसप्रति प्रतियोगिनो हेतुता। अत्रादृष्टजन्यवारणाय समवाये
न जन्यत्वावच्छिन्नं प्रतितादात्म्येन द्रव्यत्वेन कारणत्वं कार्यतावच्छेदकं च जन्यत्वं प्रतियोगितासंबंधेन प्रागभाव एव यदि स्वरूपसंबंधरूपं प्रतियोगि
त्वं न चेत्तदा प्रागभावस्य कार्यतावच्छेदकत्वं नस्यादित्याशंकते नचेति। अन्यथा स्वरूपसंबंधरूपप्रतियोगितांत्वीहसतत्संबंधेन प्रागभावस्यैव जन्य
तावच्छेदकत्वोपगमे। ननु प्रागभावत्वरूपानुयोगितानिरूपितप्रतियोगितासंबंधेन प्रागभावस्य जन्यतावच्छेदकत्वे तु नात्यंताभावसाधारण्यमित्य
त आह। गौरवादिति। तथा च सुतरामिति। तथा च साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकसामान्यांतर्गतसार्द्रेंधनत्वायोगोलकभेदत्वा पृ.म.
दिरूपोपाधितावच्छेदकस्यापि साध्यसमानाधिकरणसमवायकालिकविशेषणतादिसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात् प्रतियोगिताव १६
च्छेदकसंबंधाविवक्षायां प्रथमलक्षणेऽतिव्याप्तिः स्यादित्यर्थः। ननु प्रतियोगितावच्छेदकमात्रस्यैव साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वमितिनि

पमोऽनुपपन्नः। जातित्वादिसाध्यके प्रमेयत्वादिहेतौ हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकजातित्वादेः साध्यवन्निष्ठाभावप्रतियोगितासामान्येन व
च्छेदकत्वात् तादात्म्यसंबंधेनोपाधेर्जातित्वावच्छिन्नस्य साध्यवतिभेदासत्त्वात्। संबंधांतरावच्छिन्नज्ञानस्याभावप्रतियोगितायां जातित्वादिघटकस
मवेतत्वादेरेवावच्छेदकत्वसंभवेन नित्यत्वादिघटितजातित्वादेर्गौरवेणानवच्छेदकत्वात् यदि च विषयितादिसंबंधेन ज्ञानस्याभावस्य समवेतत्वादेर्न
प्रतियोगितावच्छेदकत्वसंभवः तादृशाभाववति तत्तद्व्यक्तित्वादिना घटादिरूपसमवेतविषयके तादृशज्ञानस्याभावासत्त्वप्रसंगादित्युच्यते तदापि ई
दृशमीश्वरज्ञानं प्रमेयत्वादिसाधनवन्निष्ठभेदप्रतियोगितावच्छेदकस्येश्वरसमवेतत्वविशिष्टस्य विषयकत्वादेरीश्वरज्ञाननिष्ठाभावप्रति
योगितानवच्छेदकत्वात्तादृशानियमासंगतिरेव। साध्यवन्निष्ठईश्वरसमवेतस्य विषयकात्यंताभावप्रतियोगितायां विशेषणतया ईश्वरसमवे
तत्वादेरवच्छेदकत्वसंभवात्। तादृशविषयकाभाववति घटादावीश्वरसमवेतत्वोपलक्षितद्रव्यत्वादिसत्त्वेऽपि तद्विशिष्टाभावसत्त्वे बाधका
भावात्। विषयितासंबंधेनेश्वरसमवेतस्य विषयकत्वावच्छिन्नाभावस्य साध्यवतीश्वरज्ञाने विश्वविषयके दुर्लभ एव। वस्तुतः सर्वत्र व्य
भिचारनिरूपकाधिकरणतद्व्यक्तिभिन्नत्वावच्छिन्नभेदेनोपाधिमादाय अतिव्याप्तिवारणं संभवति तद्भिन्नत्वस्य साधनवन्निष्ठभेदप्रतियो
गितावच्छेदकत्वात् साध्यवति तदवच्छिन्नभेदासत्त्वात्। संयोगसमवायाद्यवच्छिन्नाभावप्रतियोगितायां भिन्नत्वमात्रस्यैवावच्छेद
कत्वसंभवेनायोगोलकादिव्यक्तिभिन्नत्वस्यावच्छेदकत्वात्। संयोगसमवायादिना किंचिद्भिन्नायोगोलकादिमतितेन संबंधेन तद्भिन्नस्या

न

श्वे
ग॰टी॰
८
17

पिसत्वनियमेनभिन्नत्वाद्यवच्छिन्नस्यायोगोलकादिभिन्नत्वावच्छिन्नाभाववद्विरोधित्वात् यथाभिन्नत्वावच्छिन्नानधिकरणदेशस्याप्रसिद्धेः तथापो
गोलकभिन्नत्वावच्छिन्नानधिकरणदेशस्यापीतिकालेनकालिकसंबंधावच्छिन्नायोगोलकभिन्नत्वावच्छिन्नाभाववत्तो लभ्यं। अयोगोलकादि
व्यक्तिमात्रविषयकज्ञानाप्रसिद्ध्यासविषयकेनविषयितासंबंधेनतद्भिन्नत्वावच्छिन्नत्वाभावप्रसिद्धिस्तत्रतद्भिन्नस्याभावोभिन्नत्वावच्छिन्नाभा
वएव। नचायोगोलकादिमात्रविशेष्यकंज्ञानंप्रसिद्धमेवतत्रविशेष्यितासंबंधावच्छिन्नप्रतियोगिताकायोगोलकादिभिन्नस्याभावोनप्रसिद्धभिन्नत्वा
वच्छिन्नप्रतियोगिताकःसंभवतिविशेष्यितासंबंधेनभिन्नत्वावच्छिन्नस्यायोगोलकादेरेवतत्रसत्वादितितादृशाभावमादायातिव्याप्तिर्दुर्वारैवेतिवा
च्यं। विषयितादेर्विषयितात्वादिनैवसंबंधतानतुतद्विशेष्यितात्वादिनामानाभावात् यत्रसमानविशेष्यताप्रत्यासत्त्याज्ञानेच्छादीनांहेतुहेतुमद्भा
वःतत्रविशेष्यतायाविषयतात्वादिनैवसंबंधत्वाकारणतावच्छेदकतद्धर्मप्रकारकत्वविशिष्टनिरूपितविषयताविशेष्यतारूपेवनतुप्रकारतेत्य
तएवातिप्रसंगभंगात् अन्यथाघटविषयकमात्रस्यैवघटभिन्नविषयकत्वेपिसाध्यासामानाधिकरण्यानधिकरणत्वेसतिसाधिकरण्यमितिलक्षणो
विशेष्यतासंबंधेनसाध्यवद्वृत्तेस्तादृशसंबंधेनाभावविवक्षणेघटभिन्नमेयत्वादिसाधावतिव्याप्त्यनवकाशात् ग्रंथकृतस्तादृशसंबंधोपेक्षाया
निर्वीजत्वापत्तेः वृत्त्यनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वेतुविशेष्यितासंबंधावच्छिन्नाभावमादायातिव्याप्तिसंपादनमसंभव राम॰
दुक्तिकमेवेति। एतेनधूमादिसाध्यकव्यभिचारिहेतुकस्थलाभिप्रायेणाप्रतियोगितावच्छेदकमात्रस्येतिग्रंथसंगमनमप्यपास्तंदेवेतिमेवं। विषयि ८

तत्संबंधेनायोगोलकभिन्नत्वादिविशिष्टज्ञानाभावस्य साध्यवन्निष्ठस्य प्रतियोगितायाः अयोगोलकभिन्नत्वादेः अवच्छेदकत्वेन कथितं नियमं निर्वा
हात्। अयोगोलकघटितत्वद्भिन्नत्वरूपविशिष्टविषयके भिन्नत्वविषयकत्वसत्त्वेन विषयितासंबंधावच्छिन्नप्रतियोगितावच्छेदकताया अयो
गोलकभिन्नत्वविशिष्टाभावभिन्नत्वविशिष्टाभावयोः समनैयत्येन भिन्नत्वमात्रस्य प्रतियोगितावच्छेदकत्वासंभवात्। न चेश्वरमात्रवृत्तिसाध्यक
व्यभिचारनिरूपकघटादिभेदविषयकाभावो न साध्यवन्निष्ठ इति हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकघटभेदादेर्न साध्यवन्निष्ठाभावीयप्रतियोगिता
वच्छेदकत्वमिति वाच्यं। ईश्वरेपि कालिकसंबंधावच्छिन्नघटादिभेदविषयकाभावस्य सत्त्वात् तादृशाभावप्रतियोगितायामेव घटादिभेदस्य विषयितया
अवच्छेदकत्वात्। भेदसामान्यस्य च न प्रतियोगितावच्छेदकत्वसंभवः। पदार्थत्वमनि घटभेदविषयकं ज्ञानादिकं नास्ति भेदांतरविषयकं च वर्त्तते
तत्कालावच्छिन्नतत्तदात्मावच्छेदेन कालेभेदविषयकतावच्छिन्नाभावासत्त्वेपि घटभेदविषयकाभावसत्त्वात्। एवं धूमवान् वह्नेरित्यादावयोगो
न लकभिन्नत्वावच्छिन्नोपाधिमादायातिव्याप्तिवारणासंभवति अयोगोलकभिन्नत्वस्यापि विषयितासंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात्। न
चावच्छेदकत्वयोरेकसंबंधावच्छिन्नत्वाभावान्नातिव्याप्तिरिति वाच्यं। गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वमते प्रयोजनाभावेन एकसंबंधावच्छिन्न
त्वस्यावच्छेदकतापामरसत्त्वस्याग्रे स्फुटतरलाभात्। अथैवं धर्ममात्रस्यैव साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसंभवाद्धर्ममात्रस्यैतन्न विधाय
प्रतियोगितावच्छेदकमात्रस्येति कथनमयुक्तमिति चेन्न। ईश्वरायोगिमात्रवेद्यं तदंकुरत्वं तदंकुरान्यत्वादिकं यादृशानुल्लवृत्ति धर्मद्वयं तत्तद्विशेष्य

विषयिताभावप्रतियोगि(ता)वच्छेदकत्वं २=

कत्वाद्रेरपि समनियततया तादृशगुरुधर्मविषयकाभावप्रतियोगितायामपि तादृशलघुधर्मस्यावच्छेदकत्वसंभवेन तादृशगुरुधर्मस्यावर्त्तेना
यप्रतियोगितावच्छेदकमात्रेस्येत्यभिधानात्। यद्यपि कंबुग्रीवादिमत्त्वादेरपीति ग्रंथस्तु परप्रतिपत्त्यर्थः; अभिप्राये तोति च विवक्षितायाः स्वनिया
मकत्वस्य निर्व्यूढतार्थं द्वितीयलक्षणे एकसंबंधावच्छिन्नत्वकथनं यत्किंचित्संबंधावच्छिन्नत्वलाभार्थं। एतच्चातिव्याप्तिवारणायोपात्तं। दीधि
तौ प्रतियोगितानवच्छेदकस्य प्रतियोगितानवच्छेदकाद्रेरिति शेषः प्रतियोगितावच्छेदकत्वेपीत्यस्य प्रतियोगितावच्छेदकत्वसामान्याभाववत्ताया
उरुपपादत्वेपीत्यर्थः। साधनाव्यापकत्वदलेऽसंभववारणायेदानीं यत्किंचित्संबंधावच्छिन्नत्वं निवेश्यत इत्यत आह गगादाधर्यपरीत्यादिना।
अथैतत्कल्पे कथमतिव्याप्तिः धूमवान् वह्नेरित्यादावयोगोलकभेदत्वादेः वृक्षादिमन्निष्ठसंयोगसंबंधावच्छिन्नायोगोलकभेदाभावीयप्रतियो
गितायां भेदत्वादेरेवावच्छेदकत्वेपि अयोगोलकभेदत्वेन तदभावासंभवः विशेष्यत्वेन विशिष्टानुयोगिकाभावानुपगमात् इति चेन्न। तथापीश्वर
ज्ञानं ईश्वरविशेषगुणत्वादित्यादावुपाधितावच्छेदकमात्रस्यैव विषयितासंबंधेन साधनव्यापकतावच्छेदकतयाऽतिव्याप्तेः। महाकालान्यः का
लत्वादित्यादावुपाधिमात्रस्य कालिकसंबंधेन हेतुव्यापकत्वं न संभवति महाकालभेदाद्युपाधेः प्रतियोग्यनधिकरणमहाकालावच्छेदे
न हेतुमति वर्त्तमानकालिकसंबंधावच्छिन्नाभाववत्त्वादित्यत्रातिव्याप्तिशंकेति कृतं विस्तरेण। दलद्वयेपि प्रतियोगितायां संबंधसामान्याव
च्छिन्नत्वनिवेशे त्वाह उभयदलेइति। उपाधितावच्छेदकानां आर्द्रेन्धनत्वायोगोलकभेदत्वादीनां साध्यवद्वृत्त्यभावप्रतियोगितासामान्यानवच्छेद

कत्वासंभवादतिव्याप्तिः। नचेदानीं साध्यवृत्त्यभावप्रतियोगितासामान्यानवच्छेदकाप्रसिद्ध्या नातिव्याप्तिरिति वाच्यं। विषयिताद्रूपवृत्त्यनियामक
संबंधावच्छिन्नाभावाप्रसिद्धिमभिधायस्यैव गुरुधर्मकं वुद्ध्यादिमत्त्वादेस्तादृशानवच्छेदकत्वस्यानुपदमेवाभिधानात्। वस्तुतस्तु कंबुग्रीवा
दिमत्त्वविषयकाभावस्य प्रतियोगितायां तथाविधधर्मस्य विषयितासंबंधेनावच्छेदकत्वसंभवादसंभव एतत्कल्पेपि। यदि च तद्वारणाय एकसं
बंधावच्छिन्नमवच्छेदकत्वद्वयं प्रवेश्यते तदा कंबुग्रीवादिमत्त्वादेरपि विषयितान्यसंबंधावच्छिन्नतदनवच्छेदकत्वादतिव्याप्तिः। तदंकुरत्व तदंकु
रान्यान्यत्वमात्रविषयकयोगिमात्रज्ञानाभावप्रतियोगितानवच्छेदकत्वस्य तदन्यान्यत्वे प्रसिद्धिमभिप्रेत्यावच्छेदकत्वसामान्यनिवेशपक्षेऽति
न.
व्याप्तिरित्यर्थः। साधनसमानाधिकरणाभेदप्रतियोगितावच्छेदकसामान्यं यद्धर्मावच्छिन्नसमानाधिकरणे स्यादिति तद्धर्मप्रथमलक्षणे शंकते यद्य
पीति। अन्योन्याभावगर्भद्वितीयलक्षणे विचारयति एवमितिभ्रांतेति। अन्योन्याभावस्य तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकतया तत्प्रतियो
गितायामपि संबंधनिवेशोक्तिमविचार्य लाघवस्यान्योन्याभावगर्भलक्षणकरणबीजत्वं वदन् भ्रांत इत्यर्थः। अनुयोगिताविशेषात्मकभेदत्वस्य
निवेशे प्रतियोगितायां वृत्तेरपि तादात्म्यसंबंधावच्छिन्नत्वस्यानिवेशोस्य सभागाद्वदंतीति। स्वाभाविकेति मूललक्षणे स्वभावो हेतुरित्याशयेन दूषणं
। साध्ये यद्धर्माश्रयसकलसाधनसामानाधिकरण्यं तद्धर्मवत्त्वमित्युक्तो दोषमाह पृथिवीतीति। तथाप्येकव्यक्तिके इत्यनेन एकव्यक्तिसाध्यके इति कथं
वोधितमित्यत आह तथा च कार्त्स्न्येति। इत्यर्थः एकव्यक्तिक इति मोलपदार्थः। तथा चैकव्यक्तिकसाध्यकेऽव्याप्तिरेवेत्यस्य लाभः। सिद्धांतयिष्यते म

हर्व. ग.टी. १९ 19

णिकारे तौ वेसाशयेनाह मूलोक्ते ति। (तत्र) नत्र पक्षे सपक्ष इति पाठः सुगमः। नत्र व्यभिचारस्य इति पाठे साध्यपदपूर्वेण त्वभिनाशाद्दोषान्तरमनुसंधेयमित्य
र्थः। तथा च व्याप्य स्वरूपोत्कीर्तनमेतत्। संबंधमात्रमिति मूले न हेतुत्वसंबंधस्य व्याप्तित्वं प्रतीयते तत्राह साध्यस्येति। न व्याप्तिरिति धूमादावसत्त्वा
द्व्यभिचारित्वाद्यादौ गतत्वाच्चेति भावः। अतः सामानाधिकरण्यमिति। तथा च मात्रपदेन व्यापकत्वांशव्युदासात्तद्विशेषितं सामानाधिकरण्यं व्या
प्तिरिति मूलार्थः। साध्यसामानाधिकरण्यमात्रस्य व्याप्तित्वे व्यभिचारिण्यतिव्याप्तिर्व्यापकसामानाधिकरण्यस्य व्याप्तित्ववादिनामपीत्याह मूले व्य
भिचारीति। सर्वस्यापि व्यभिचारित्वापत्तेः असंगतिः एवं तद्व्यभिचारित्वे अन्यदीयसंबंधस्य तद्व्याप्यत्वं न संभवतीत्यतो आचष्टे तद्व्यभिचारीति। तद्वि
धेयताप्रयोजकतया तत्सामानाधिकरण्यस्य व्याप्तित्वोपगमे व्यभिचारित्वे तत्संबंधज्ञानादनुमित्यापत्तिरित्यत आह धूमादिव्याप्तिरिति तद्धर्मा
वच्छिन्नविधेयताप्रयोजकं तद्धर्मावच्छिन्नसामानाधिकरण्यविशिष्टत्वं वाच्यमित्यभिमानः। वीप्सितेति। व्यापकत्वबोधस्यानुपयुक्तत्वात्। सर्वत्रे
ति तदभाववद्वृत्तित्वविशिष्टवत्ताज्ञानविधया प्रतिबंधकत्वस्य व-स्वभावसामानाधिकरण्यविशिष्टप्रमेयत्वादिज्ञाने एवसंभवात् तथा च साध्या
भावेति तदभावसामानाधिकरण्यविशिष्टप्रमेयत्ववत्ताज्ञानस्य तदभावव्यभिचारज्ञानाभावघटितस्यैव विरोधिसामग्रीघटकत्वादिति भावः।
यावंतोऽर्था इति न्यायेन साध्यसामानाधिकरण्योपलक्षितहेतुमत्ताज्ञानस्य तद्विशिष्टहेतुमत्ताज्ञानस्य च कारणत्वं क्रमेण दूषणीयमिति तदु रा.म. १९
भयसाधारण्यात्तद्बोधं व्याचष्टे तद्बोध इति। आवश्यकत्वेनेति। अन्यथा धूमे व्यभिचारदेशायामपि वह्निव्याप्यवानिति ज्ञानमादाय अनुमित्यापत्तेः। उ

शानव

अन्यत्रलक्ष्येसाध्यन्यथा १=

चितमिति। अन्यथासिद्धेरिति शेषः। साध्याभाववद्वृत्तित्वरूपव्यभिचारपदार्थमादायाशंकामुद्धरति। साध्यस्येति। तथाच व्यतिरेकिसाध्यके साध्य
स्य केवलान्वयित्वग्रहदशायामनुमित्यनुदयेऽप्युपपत्तिः। केवलान्वयिसाध्यके च साध्यस्य तदग्रहदशायाम व्यभिचारपदार्थोपपरस्य रोपश्लेषा
वगाहित्वेन कारणत्वस्वीकारात्तदनुमितिरिति किं व्यभिचारज्ञानाभावस्य साध्यसिद्धेरनुतयेति भावः। उक्तान्यथासिद्धिं विघटयति नन्विति। सामा
नाधिकरण्यमात्रावच्छिन्नप्रकारकपरामर्शजन्यानुमितावपि किंचिद्धर्मावच्छिन्नलिंगधर्मिकव्यभिचारग्रहाभावः कारणमित्याशयः। वस्तुत
स्तु घटो वह्निव्यभिचारीत्यादिग्रहस्य प्रतिबंधकत्ववारणाय धर्मितावच्छेदकानिवेशोपि समानधर्मिकयोर्व्यभिचारग्रहपक्षधर्मताग्रहयोर्निवे
शो वाच्यः। धूमान्तरधर्मिकव्यभिचारग्रहसाधारण्यप्रतिबंधकत्वानुरोधेन धर्मितावच्छेदकनिवेशस्तु हेतुतावच्छेदकाग्रहस्थलीयसामग्र्या अनुमित्य
प्रयोजकत्वमेवेति सदृष्टान्तमाह एवमिति। दीधितिकारोक्तं लाघवं स्वयं निराकरोति इदमिति। सामंजस्यादिति निरवच्छिन्नविशेषणतया हेतुत्वे तु का
यव्यूहस्थलेऽननुपपत्तिर्दुष्टा। तदात्मनीत्यादिना तच्छरीरावच्छेदेन तदानीमेव व्यभिचारज्ञानाभावउपपादितः। अन्यशरीरावच्छेदेन तदात्मप्र
त्यासत्तस्य तत्स्वे वाच्यात्मप्रत्यासत्त्यवच्छेदकतच्छरीरप्रत्यासन्नत्वात्। अथैतन्मते तिषाधयिषाविरहात्सिद्ध्यभावस्यासिद्धिकाले घटावच्छेदे
न सत्वादनुमित्यापत्तिमाशंक्य कारणताघटकनियमस्य कार्याधिकरणे कार्याव्यवहितप्राक्कालावच्छेदेन देशानिष्ठावच्छेदकतानिरूपकत्व

स्वे.
ग.टी.
२०
20

विशेषितत्वाविशेषितवृत्तिघटितत्वेन द्वैविध्यमभिधाय सिद्ध्यभावे तद्विशेषितवृत्तिघटितो नियमो न संभवतीति तदविशेषितनियमं सुसाधयतस्त
देशविशेषावच्छिन्नवृत्तेरेवाधिकरणे कार्योत्पत्तिनियामकत्वमुपगम्य सिद्ध्यभावस्यात्मनि दैशिकव्याप्यवृत्तित्वस्य सर्वानुभवसिद्धस्य निर्वाहाय
देशानवच्छिन्नावृत्तिः स्वीकृतेति तद्वृत्तिरवच्छिन्नवृत्तित्वे व्यभिचारज्ञानाभावस्य कारणतानुपपादनमेवेति चेन्न । कायव्यूहादिस्थले पृथगेव कार्य
कारणभाव इत्यभिप्रायात् । हेतुतायामिति । हेतुता च स्वरूपसंबंधविशेषः न तु व्यापकतेति भावः । नन्वत्रोभयप्रसासत्त्वाप्रसासत्त्वकार्यतावच्छेदका
वच्छिन्नं प्रति उभयप्रसासत्त्वाप्रसासन्नकारणतावच्छेदकावच्छिन्नस्य नियामकत्वं वाच्यं एवं च व्यभिचारज्ञानत्वावच्छिन्नस्यापि कायव्यूहस्थले
एतदात्मनिष्ठशरीरांतरावच्छेदेन एतच्छरीरावच्छेदेन च परस्परप्रवेशकर्तृत्वात् तत्र तच्छरीरे तदात्मनोः सत्त्वात् तदुभयत्रानुमित्यापत्तिरित्यत आ
ह उभयेति । तद्धर्मावच्छिन्नयादृशसंबंधावच्छिन्नकार्यतानिरूपितस्वावच्छिन्नकारणताघटकप्रत्यायदधिकरणसंबद्धकारणतावच्छेदका
वच्छिन्नव्यक्तेः तद्धर्मावच्छिन्नयादृशसंबंधावच्छिन्नतत्कार्यतानिरूपितस्वावच्छिन्नकारणताघटकप्रसासत्त्यंतरेणाधिकरणं यत्र तत्रादृ
शसंबंधेन तदधिकरणसंबद्धतत्कार्यतावच्छेदकावच्छिन्नस्य तादृशसंबंधांतरेण संबंधीति सामग्रीव्याप्तिः स्वीकार्या । अथ चैत्रस्य वह्निव्या
प्यवानिति परामर्शदशायां सिद्धिसत्त्वेऽनुमित्यापत्तिः । उभयाधिकरणप्रसासन्नकार्योत्पत्तिप्रयोजकस्योभयप्रसासन्नाव्यभिचारविषयक राम. २०
सामानाधिकरण्यग्रहस्यानवच्छिन्नकारणतावच्छेदकसमवायसंबंधेन कारणाधिकरणे तत्कार्यताश्रयत्वं किंचिद्भिन्ननिष्ठतदवच्छेदकसंबंधा

वच्छिन्नकार्यत्वान्तरनिरूपितकारणतावच्छेदकीभूतनिखिलधर्मावच्छिन्नवत्त्वमपि निवेश्यं परामर्शकार्यतासमानाधिकरणकार्यत्वान्तरनिरू
पितकारणतावच्छेदकीभूतसिद्ध्यभाववत्त्वावच्छिन्नविरहाद्दोष इति वाच्यं। कायव्यूहस्थले यच्छरीरावच्छेदेन परामर्शः तदन्यशरीरावच्छेदेन
सिद्ध्यभाववत्त्वात्तच्छरीरावच्छेदेनानुमितिप्रसंगात्। अत्रेदं समाधानमवगन्तव्यं। तद्धर्मावच्छिन्नयत्किंचिद्व्यक्तिनिष्ठत्वसंबंधावच्छिन्नकार्यत्वान्तरनि
रूपितस्वेतरकारणतावच्छेदकीभूतायावन्तो धर्माः प्रत्येकं तदवच्छिन्नकूटविशिष्टतदधिकरणेतरत्वसंबंधावच्छिन्नतद्व्यक्तिनिष्ठकार्यतानिरूपित
स्वावच्छिन्नकारणताघटकप्रत्यासत्त्या प्रत्यासन्न तद्धर्मावच्छिन्नकक्षेः तद्व्यक्तिनिष्ठत्वसंबंधान्तरावच्छिन्नकार्यत्वान्तरनिरूपितस्वेतरकारणतावच्छेदकी
भूतायावन्तो धर्माः प्रत्येकं तदवच्छिन्नकूटविशिष्टेतरत्वसंबंधान्तरावच्छिन्नतद्व्यक्तिनिष्ठकार्यतानिरूपितस्वावच्छिन्नकारणताघटकप्रत्यासत्सं
न्तरेणाधिकरणं यत्नेन संबंधेन तदधिकरणप्रत्यासन्न तद्धर्मावच्छिन्नमेतत्संबंधेनाधिकरणमित्येव सामग्री आसिः [redacted] पर्वतो वह्निमानिति
सिद्ध्यभावस्यापि एतन्मते सामानाधिकरण्यसमानावच्छेदकत्वप्रत्यासत्त्या एकहेतुत्वात्। यदि चैवमपि तच्छरीरावच्छेदेनात्मनि सिद्ध्यभावो
स्त्येवेति सूक्ष्ममीक्ष्यते तदा समवायसंबंधेन तत्कारणाधिकरणे तत्कार्यताश्रयतद्देशावच्छिन्नतदधिकरणनिष्ठकार्यत्वादनियामकीभूतयाव
त्कारणप्रतियोगिकतत्तद्देशावच्छिन्नसंबंधवत्त्वमेव विशेषणमिति। यद्देशावच्छेदेनेति स्वावच्छेदकावच्छिन्नत्वस्वाधिकरणनिरूपितत्वस्वाव्यव
हितप्राक्कालावच्छिन्नत्वैतत्त्रितयसंबंधेन कार्यविशिष्टायाश्च निरुक्तद्वितीयनियमःकारणताघटक इति फलितार्थः। महाशरीरनाशस्येति महाश

शर्व-
ग॰टी॰ री
३१

रीरनाशात्क्षणे खंडशरीरेऽसत्त्वमभिधानं च विनश्यदवस्थस्य न प्रतिबंधकत्वमिति मतेनाप्रमहाशरीरनाशोत्तरक्षणे खंडशरीरे तत्त्वनिश्चयत्वेऽप्येतद्दोषोऽस्ये
वेति बोध्यं। द्वितीयक्षणे खंडशरीरे एवं व्यभिचारग्रहसंभवात् उत्पाददशायामिति। तच्छरीरेति। तादात्म्यसंबंधेनावच्छेदकस्य कारणत्वादिति भा
वः। शरीरेति। अथ चरणाद्यवच्छेदेन व्यभिचारज्ञाने सत्त्वेऽपि खंडशरीरे द्वितीयक्षणे नानुमितिः तथा चैतदपि तु शाकतेसामानाधिकरण्यज्ञानरूपका
रणाविरहादिति चेन्न। चरणाद्यवच्छेदेन सामानाधिकरण्यज्ञानसत्त्वात्। अथैवं खंडशरीरावच्छेदेन कथमनुमित्यापत्तिः तदवच्छेदेन सामानाधि
करण्यज्ञानासत्त्वात्। चरणाद्यवच्छेदेन वर्त्तमानस्य तस्य प्रयोजकत्वे लिंगापत्तिरेव स्यादिति अत्रेदं समाधानं सामानाधिकरण्यसमानधर्मितावच्छे
दकतापन्नत्वात् सन्निकृष्येन परामर्शस्य विशेषणतासंबंधेन सिद्ध्यभावस्य च कारणत्वं तत्र चैत्रस्य परामर्शः मैत्रस्य सिद्ध्यभावः तत्र मैत्रस्यानुमित्यापत्तिः
पर्वतत्वादौ चैत्रीयपरामर्शसत्त्वात् अतः समवायेन तदात्मसमवेतत्वावच्छिन्नप्रतितादात्म्यप्रत्यासत्त्या तदात्मत्वेन कारणतां स्वीकृत्य परं किंचि
दनुमितिव्यक्तिनिष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकानि विलधर्मावच्छिन्नात्मिकाया सामग्रीसमवायेनानुमिति
प्रयोजिका तस्यां धर्मितावच्छेदकतासंबंधेन तदनुमित्युत्पादप्रयोजिकायाः पर्वतत्वादिनिष्ठसामग्र्या अप्येककालीनत्वसंबंधेनैव विशिष्यम ग॰म॰
पेक्षितं। एवं च तत्र चैत्रस्य न सिद्ध्यभावघटितसामग्री मैत्रस्य न परामर्शघटितसामग्रीति नोक्तदोषः। यत्र तु चैत्रस्य सिद्ध्यभावपरामर्शोभयं त ३१
त्र तस्य तादृशसामग्र्याः पर्वतत्वनिष्ठतदनुमितित्यक्तुत्पादकसामग्रीविशिष्टायाः सत्त्वं तत्र तदवच्छेदेन समवायेनानुमित्युत्पादः एवं च तदात्म

सामानाधिकरण्य ज्ञानव्यभिचारग्रहाभावरूपसामग्र्या अवच्छेदकतासंबंधेन खंडशरीरवृत्तिव्यभिचारग्रहाभावावयववृत्तिसामानाधिकरण्य
होभयविशिष्टतया खंडशरीरावयवोभयावच्छेदेन तदात्मनि शानुमितिव्यक्तुत्पादप्रयोजिकायाः सत्त्वात् तदुभयावच्छेदेनैकस्या एव व्यक्ते
रुत्पादनं भवतीति किमनुपपन्नं। अव्यभिचारग्रहकारणत्वे तु व्यभिचारस्य तद्विरोधिनः सत्त्वात् तत्समानावच्छेदेन तत्तत्त्वेनापि खंडशरीराव
च्छेदेनेतिन दोष इति। अथ यत्रावयवावच्छेदेन सिद्धिव्यभिचारज्ञानं च तत्र खंडशरीरावच्छेदेन सिद्ध्यभावसत्त्वादुक्तप्रणात्यानुमित्सापत्ति
रिति चेन्न। देशानवच्छिन्नवृत्तेर्व्यभिचारज्ञानावच्छेदकावच्छिन्नवृत्तेरेव नाकार्येसादप्रयोजकतया तदेकतरवृत्तेरभावात्। सामानाधिकरण्यज्ञा
नावच्छेदकावच्छेदेन व्यभिचारग्रहाभाववृत्तेरेव कार्येसादप्रयोजकत्वेऽव्यभिचारज्ञानकारणतानतिव्याप्तिस्यप्यत्र सबीजमेवायाद्दृशासा
ध्यहेतुकव्यभिचारज्ञानं एवं विधरीत्या संपद्यते तादृशसाध्यहेतुकस्थले व्यभिचारज्ञानाभावहेतुत्वानिराकरणेऽपि न सर्वत्र तन्निराकरणं भव
ना तीत्यपरे रसः। अन्ये इत्यनेनाव्यभिचारसामानाधिकरण्यविषयकत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहात् कार्यकारणभावद्वैविध्येन
भिन्नविषयकप्रत्यक्षसामग्रीप्रतिबंधकतायां विनिगमनाविरहेणाद्वयोरपि प्रवेशापत्त्या महागौरवमिति इत्यपि वदंतीत्यस्वरसः। विशेषणानव
स्थेति। न च जगतीतले क्वचिदात्मनि यादृशप्रामाण्यग्रहघटकसंख्याऽन्यत्र क्वापि तदधिकसंख्या होना तावन्मात्रविशेषणविशेषणा
प्रवेशान्नानवस्थेति वाच्यं। तस्मा एव विशेषणानवस्थापदार्थत्वात् तावद्विशेषणेषु अवच्छेदकतापादनात्। तच्चाव्यभिचारविषयकाप्रामाण्य

पूर्व॰
ग॰टी॰
२२
22

ग्रहेऽप्रामाण्यनिश्चयसत्त्वेऽनुमितिरूपगम्यते न तु तत्राप्रामाण्यग्रहे इति। यद्यदप्रामाण्यज्ञानसत्त्वे तद्धर्मिकाप्रामाण्यनिश्चयसत्त्वेऽ
नुमितिः तत्तदप्रामाण्यनिश्चयाभावविशिष्टतत्तदप्रामाण्यग्रहस्य सर्वस्यैव पृथक् पृथक् प्रतिबंधकत्वमनुमित्युत्पादभयेनांगीकार्यं तदभा
वानां च तादृशाप्रामाण्यग्रहरूपसहकार्यपेक्षा। एवं व्यभिचारग्रहप्रतिबंधकतायामप्यप्रामाण्यनिश्चयाभाववैशिष्ट्यमेव तत्तदप्रामाण्य
घटिताप्रामाण्यनिश्चयाभावविशिष्टतत्तदप्रामाण्यग्रहाणां पृथक् पृथक् प्रतिबंधकत्वमिति न कापि विशेषणानन्त्याप्रसंग इति। यत्तु
तर्कालंकारेण व्यभिचारज्ञानप्रतिबंधकतायां भ्रमत्वनिश्चयत्वेन नोत्तेजकत्वं व्यभिचारज्ञानं तदंशे भ्रम इति निश्चयसत्त्वे व्यभिचारसंदेहदशा
यामनुमित्यनुत्पादात्। किंतु भ्रमत्वनिश्चयविशेषाणां तत्तद्व्यक्तित्वेनैव तथात्वं तथा च भ्रमत्वनिश्चयत्वेनाप्रवेशान्न गौरवमित्यंशश्च व्यभि
चारज्ञानत्वावच्छेदेन भ्रमत्वनिश्चयानां तादृशभ्रमत्वनिश्चयत्वेनानुगतरूपेण निवेशोऽन्यथा तादृशानंतभ्रमत्वनिश्चयव्यक्तीनां तत्तद्व्य
क्तित्वेनाभावकूटस्य निवेशे गौरवादिति गौरवं व्याख्यातं तदपेशलं। सामानाधिकरण्येन तद्व्यभिचारज्ञानविषयकभ्रमत्वनिर्णयानामनंता
नां तद्व्यक्तित्वेनाभावकूटनिवेशानौचित्येन तत्रैव दूषणस्य योजयितुं शक्यतया व्यभिचारज्ञानत्वावच्छेदेनैतदनुधावनवैयर्थ्यात्। विशेष्य राम॰
त्वसामानाधिकरण्योभयसंबंधावच्छिन्नाप्रामाण्यनिश्चयाभावप्रतियोगिनां गुरुतररूपेण निवेश इति दीधितिकृदभिप्रायसामंजस्यात्। २२
यदपि च तेनैवाभिहितं व्यभिचारज्ञानत्वावच्छेदेनाप्रामाण्यनिर्णयपरत्वे व्यभिचारज्ञानसामान्यमप्रमेति ज्ञानसत्त्वेऽपि इदं ज्ञानं व्यभिचा

मे रविषयकं न वेति इदं ज्ञानं प्रत्येव वा गृहीतस्य व्यभिचारज्ञानस्योत्तरमनुमित्युत्पादाद्व्यभिचारज्ञानत्वावच्छेदेनाऽप्रामाण्यं निश्चयपदस्योत्तेजकं
त्वं किंतु विशेषणतया वेति पुनराशंक्य तत्तदप्रामाण्यज्ञानाभावविशिष्टव्यभिचारज्ञानत्वेन प्रतिबंधकतायां तत्तदप्रामाण्यज्ञानाभावव्यक्तीनां विशे
ष्यविशेषणाभावभेदेन प्रतिबंधकतानंत्यं स्यादतोऽव्यभिचारविषयकनिश्चयत्वेनैव हेतुतासंभवात्तथा सति तद्धर्मिकाप्रामाण्यज्ञानानां तत्त
द्व्यक्तित्वेन स्वातंत्र्येण प्रतिबंधकत्वान्नावच्छेदकगौरवावकाश इति तदेतत्सर्वमपेशलं। अप्रामाण्यज्ञानाभावविशिष्टव्यभिचारविषयकनिश्चय
त्वेन हेतुताव्यवस्थापनपरदीधितिग्रंथतः तद्धर्मिकाप्रामाण्यग्रहाभावस्य पृथक् हेतुताया अलाभात् कथंचित्तल्लाभोपगमेपि भवतां तत्तद
प्रामाण्यज्ञानाभावकारणतानंत्यं तत्तदप्रामाण्यज्ञानाभावकूटविशिष्टव्यभिचारज्ञानत्वावच्छिन्नाभावत्वेनैकहेतुतासंभवात् अन्यथा तावत्सि
षाधयिषाविरहविशिष्टसिद्धित्वावच्छिन्नाभावस्याप्यनुगमानुपपत्तेः। न च पक्षताग्रंथे तथादीधित्यनुसारेणाव्याख्यानमिह तु एतादृशदीधित्य
नुसारेणोत्थाप्यत इति न पूर्वापरविरोधः मतभेदेन समाधानसंभवादिति वाच्यं। एवमप्येतद्दीधितिग्रंथस्याप्रामाण्यनिश्चयाभावविशिष्टव्यभि
चारज्ञानाभावाप्रामाण्यज्ञानाभावविशिष्टव्यभिचारनिश्चयहेतुतयोस्तात्पर्यतायास्तत्कालंकारैरपि उपक्रांततया तदुपसंहारासंभवे तस्य रि
त्यागस्यासामञ्जस्यकवलितत्वे समाधानानुपपत्तेः। एवमप्रमात्वं अव्यभिचारवति व्यभिचारप्रकारकत्वं तच्च पक्षे व्यभिचारत्वं पुरस्कृत्य गृहीतं त ज्ञान
त्रेदं तत्पुरस्कृत्य व्यभिचाराविषयकत्वं व्यभिचारवति व्यभिचारप्रकारकत्वं वा गृहीतं तु शंक्यते एवं धर्मितावच्छेदकभेदेन तदुभयस्यापि आवर्ज्जीकान्य

स्व्य.
ग.टी.
२२

त्वात् तत्राप्येव्यभिचारविषयकत्वसमानाधिकरणाव्यभिचारप्रकारकत्वप्रकारकविषयित्वे च द्वितीये च समूहालंबने उभयभाने पि व्यभिचारवद
वच्छेदेन भ्रमत्वाभावाधिकरणवृत्तिः सेति। तादृशज्ञानान्यतरेणाप्रामाण्यज्ञाने। प्रामाण्यं गृह्यते विरुद्धार्थविषयकत्वहेतुनाया व ज्ञानमगृह्यते ता
वदनुमितिरुपगमे सत्प्रतिविरह एव वाच्यस्तु वाव्यभिचारविषयकत्वज्ञानविशिष्टव्यभिचारज्ञानस्य प्रतिबंधकत्वप्रामाण्यप्रमात्वेन निश्चितव्यभिचारज्ञा
नवदिति शंकायां अत्र तु च्छत्वादिति। अप्रमाण्यनिश्चयाभावविशिष्टव्यभिचारज्ञानाभावस्य तद्व्यक्तित्वेन कारणत्वं तु सिषाधयिषाविरहविशिष्ट
सिद्ध्यभावादेस्तद्व्यक्तित्वेन हेतुतानिरूपकत्वादीतियत्तमिति तत्रेह निरूक्तं। यत्तु तर्कालंकारेणाप्यधायि व्यभिचारज्ञानप्रतिबंधकतामते व्यभि
चारव्याप्यव्यभिचारावच्छेदकज्ञानानामपि प्रतिबंधकत्वमिति महागौरवमिति। अत्र चेदं वक्तव्यं एवं सति दीधितौ न्यूनतायाः कथं परिहारः। अव्यभि
चारविषयकत्वानेयात्वावगाहिनो व्यभिचारज्ञानस्यैव गौरवांतरेणासाक्षाद्विरोधितापत्तिसेपसंभवात्तत्तुच्छत्वं व्यभिचारव्याप्यादीनां ज्ञानमादाय गौ
रवेणाव्यभिचारज्ञानप्रतिक्षेपप्रदर्शनं न न्यूनमिति समिपापाद्यन्यूनतेति चेन्न हि इदं महागौरवमनुद्भाव्यमेवेति साध्यसंदेहदशायामिति विशेषणां
तराभाववत्त्वेन गृहीतविशेषणसंसर्गाग्रहः विशेषणांतराभाववत्त्वेनासंदिह्यमानविशेषणविशेष्यसंबंधज्ञानाभावो वा विशेषणविशेष्य राम.
संबंधज्ञानसहितः तत्सामग्रीतयाः अस्वतत्वादिति भावः। विशेषणविशेष्यसंबंधज्ञानायुक्तत्वे संशयापादोत्सर्गिक इति। साध्यसंशयात्साध्यवद्वृत्ति २२
त्वसंशयद्वारा तद्विशिष्टसंशयः संशयसामग्री च निश्चयविघटिकेति। स्यावर्त्तधर्मेति। यत्र साध्यवज्ञानिर्णयस्तत्र साध्याभावसंशयाद्यभानात्साध्यस

पूर्व॰ ग॰टी॰ २४ २५

ततत्साध्याभावच्छेदेन विशिष्टधूमवत्तानिश्चय इत्यर्थः =३

मानाधिकरण्यविशिष्टधूमवत्तानिश्चयः यत्रवा साध्यसंशयोत्तरं साध्यवत्तानिश्चयस्तत्र तदुत्तरं साध्यवतिविशिष्टधूमवत्तानिश्चयस्तत्रापि सिद्ध इत्युभ
यस्थलसंग्रहार्थः। साध्यवत्तानुसाध्यसामानाधिकरण्यविशिष्टवान् अयं च साध्यवानिति ज्ञाने साध्यसामानाधिकरण्यविशिष्टसंशयविरोधित्वात्।
स इत्यनेन साध्यसंशयमात्रपरामर्शे तु साध्यसंशयोत्तरकालीनसाध्यनिश्चयस्थले न द्विविशिष्टसंशयविरोधिनोऽप्रदर्शनान्न्यूनता स्यादिति वोध्यं। एव
कारेणाच साध्यवत्तानिश्चयस्योपयोगित्वमवेयत्ससाध्यसामानाधिकरण्यविशिष्टवैशिष्ट्यनिश्चये साध्याभाववत्ताज्ञानस्य प्रतिबंधकत्वमेवोपेयते अतो
नान्योन्याश्रय इति शंका समुदासः। मणिमंत्रादिन्यायेन प्रतिबंधकत्वे मानाभावात् निश्चयान्यसमावर्त्तकधर्मदर्शनविधया प्रतिबंधकत्वासंभवात् साध्या
भाववत्ताज्ञानप्रतिबंधापत्साध्यवत्तानिश्चयापेक्षणे तु नान्योन्याश्रयावारणाच्च निश्चितेति विशेषणाभाववत्त्वेनासंदिग्धमानविशेष्यसंबंधत्वानस्य
विरोधित्वादिति भावः। वह्न्यजन्यधूमसंभावनायाश्च विरोधितायस्ताद्यवत्ताननुधावनं। वह्निजन्यं वह्निसमानाधिकरणमिति ज्ञाना सत्त्वस्थले
तु अव्यभिचरितसाध्यसामानाधिकरण्यनिश्चयायत्तायइष्टएवेति भावः। सामान्यलक्षणानंगीकारेण्याह धूमव्यापकेति। इत्यादिकमित्यादिना ज्ञा
नवानित्यनुमित्यपलापप्रसंगो ग्राह्यः॥ ॥छ॥ ॥इत्यारडोपाह्वकृष्णभट्टोन्नीतापूर्वपक्षग्रंथविवृतिः॥ ॥छ॥ श्रीगणेशायनमः॥ छ॥

ग॰प॰ २५

पत्रे २८

श्लोक
१५००